PROC. & TRAN. OF THE
ALL-INDIA ORIENTAL CONFERENCE
VOL.

PROCEEDINGS AND TRANSACTIONS

OF THE

ALL-INDIA ORIENTAL CONFERENCE

TWELFTH SESSION

Benares Hindu University

1943-4

VOL. IV.

BENARES HINDU UNIVERSITY.

1948

Price Rs. two only.

PROCEEDINGS AND TRANSACTIONS

OF THE

ALL-INDIA ORIENTAL CONFERENCE

TWELFTH SESSION

Benares Hindu University

1943-4

VOL. IV.

Papers of the Sanskrit and Hindi Sections.

Edited and published for the Conference

By

DR. A. S. ALTEKAR, M.A., LL.B., D. LITT.

Head of the Department of Ancient Indian History and Culture

Benares Hindu University.

1948

Price Rs. two only.

First Edition, 1948.

600 copies.

Copies of this volume can be had by the members of the 12th Session from the Local Secretary, 12th All-India Oriental Conference, New D/2, Benares Hindu University, and by others from the Hon. Secretary, Bhandarkar Oriental Research Institute, Poona 4.

Printed in India
at the Vikrama Panchanga Prees, Benares
By
Ganga Prasad Sukla.

Preface to Vol. IV.

Vol. IV of the Proceedings and Transactions of the 12th Session of the Oriental Conference is being herewith offered to the public. I am conscious of the great delay in its publication, but those who are aquainted with the numerous difficulties of printing in the post-war period, may perhaps be inclined to condone even this inordinate delay. I am extremely sorry for it.

Papers of the Sanskrit and Hindi sections are included in the present volume. It was not possible to send the proofs of the papers to their authors, but all possible care was taken to minimise the mistakes in proof reading.

Vol. I, consisting of the actual proceedings of the Conference, is being published simultaneously with this Volume. Vol. II was published in Oct. 1946. Vol. III consisting of the papers of the Archaeology, Linguistics, Technical Sciences and Iranian Sections is in an advanced stage of printing. Papers of Vol. V, consisting of the Arabic Persion and Islamic Culture sections, were probably destroyed during the disturbances of unfortunate Lahore in August 1947. Repeated enquries have elicited no response from the press, which was entrusted with the printing work.

I am very much thankful to Pandit D. S. Malvania, Dr. P. L. Vaidya and Mr. Avadh Kishore Narain for helping me in reading part of the proofs of this volume. The publication of this volumo even after four years is due to the proprietor of the Vikrama Panchanga Press, Mr. Nagesh Upadhyaya, M. A., having agreed to undertake the printing at his new press, which he has recently started. I am thankful to him for finishing the work in a short time.

Benares Hindu University
1-3-1948

A. S. Altekar

संस्कृतहिन्दीविभागलेखात्मकश्चतुर्थो भागः ।

अनुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

चतुर्थो विभागः।

पण्डितपरिषत्प्रबंधाः।

स्वागतभाषणम्।

(म० म० पंडित चिन्नस्वामी शास्त्री)

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु॥

मान्यास्सभापतिमहोदयाः, सभ्या विबुधवराश्च,

स्वागतमस्तु तत्रभवतां भवताम्। अध्वगतमवर्णनीयमविगणय्य नैकविधं क्लेशजातं विधूय च विविधानि विशिष्टानि कार्याणि चिरबद्धसुरगवीश्रद्धातिशयेन वा, स्थानान्तरदुरवापमानन्दवनैकसंप्राप्यमानन्दमनुभवितुमेव वाऽस्मदनुजिघृक्षयैव वा ऊरीकृत्यास्माकीनामभ्यर्थनां स्थानेऽत्र निजपदपाथोजार्पणेनाऽस्मान् कृतार्थयतां श्रीमतां पुरतः केन वा शब्देनात्मनः कृतज्ञतामावेदयितुं प्रभवाम इति चिरमन्विष्यान्विष्याप्यन्ततोऽनवाप्यैतत्तादृशं पदकदंबकं मूकीभूताः, अकिञ्चनाश्च वयमपश्यन्तोऽन्यत् श्रीमत्तोषकारणं केवलमञ्जलिबन्धेनैव श्रद्धासमादरसंभृतमात्मनो हृद्गतं भावं विनिवेदयामः। अखिलभारतवर्षीयप्राच्यविद्यापरिषदः प्रतीकभूतेयं विद्वत्परिषद्यत्वेऽत्र वारणस्यां श्रीविश्वविद्यालये सम्मिलतीति महदिदममन्दानन्दसंदोहास्पदम्। इयं पुरी पुरभिदः, भुवनत्रयवरिष्ठा वीतरागाणां, भक्तिमत्प्रवराणां धार्मिकधौरेयाणां विशेषतो विपश्चिदपश्चिमानां नित्यमावासभूमिः, आ च परमेष्ठिनः आचार्यतनविद्वद्व्रातं, विद्याविटपिनो विविधान्यगणीयान्यद्भुतरसानि विस्मयावहानि फलानि प्रसूतेऽस्म जनयन्ति चाऽद्यापि। बहवो विद्वद्वराः प्राचीना अर्वाचीनाश्चाऽत्रैव प्राप्तजनुष आचन्द्रतारमनुवर्तिन्याऽच्छाच्छयाऽऽत्मनः कीर्तिकौमुद्याऽनवरतमेधमानया दिग्दन्तिमुखान्यलिम्पन्। विश्वविद्यालयोऽप्ययं विविधासु विद्यासु कलासु विश्वोन्नतिं बिभ्रत् पूज्यैः महामनोभिः श्रीमालवीयमहोदयैस्समुत्पादितो विश्वविख्यातवैदुष्यप्रकर्षैः श्रीसर्वेपल्लिराधाकृष्णमहोदयैस्संरक्षितः सुविराजत इतीदमपरोक्षमेव प्रायस्सर्वेषां विदुषाम्। तत्तादृशविश्वविद्यालयोद्भासितविश्वनाथनगर्यां ज्ञानैकनिधाने परिषदियं स्थाने खल्वात्मानं लभत इति। प्राच्यविद्यापरिषदोऽस्या द्वादशमिदमधिवेशनमिति स्पष्टमेव। प्राच्या विद्याः प्रायेणात्मसात्कुर्वन्तीयं परिषत् विशेषतो गैर्वाणीं वाणीं विविधेषु विषयेषु निदानीकरोतीत्यविवादम्। तथापि दुग्धदोहां गामिव समये तां विस्मरति। द्वादशस्वधिवेशनेषु अस्यास्संवृत्तेषु संस्कृतविद्वदधिवेशनानि नार्धाधिकान्यात्मानं लब्धुमशकन्। अतस्तदधिकारिणां पुरतस्समुपस्थाप्य विषयमिमं निवेदयितुमभिलषामो विषयान्तरैस्सहाऽस्या अपि स्थानं समानमेव भवत्विति।

अयि मान्याः प्राज्ञवराः,

यामिमां विफलां वार्ता प्रवदन्ति मनीषिणोऽपि सेयं न तथा । परमेषा दोग्ध्री कामानां, निहन्त्री त्रिविधस्याऽपि दुःखस्य, प्रसवित्र्यात्मज्ञानफलस्य, धर्म्ये पथि विचरतां राज्यधुरं बिभ्रतां, भवसंगं जिहासतां आत्मन्येवारिरंसतां मनोविनोदमभिलषतामप्यतिरस्करणी यमनन्यसाधारणं साधनमिति को नामाऽत्र प्रगल्भते विवदितुम् । पद्यमिदं अत्रोपस्थितिपदमारोहति महाकवेर्भवभूतेः—

"कामं दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तिं सूते दुर्हृदो विप्रलान्ति । शुद्धां शान्तां मातरं मंगलानां धेनुं धीरास्सूनृतां वाचमाहुः ॥ इति ॥ अत्रैव चतुर्दशाष्टादश वा विद्या विजृम्भन्ते । अत्रैव नीतिग्रन्थाः । अस्यामेव च कलाश्चतुष्षष्टिपरिमिताः । अस्यामेव काव्यनाटकालंकारगणितायुर्वेदादयः भूगर्भविद्या, वास्तुविद्या, इत्यादीनि न वयमवगन्तुमीश्महे । यदनया परित्यक्तमन्यत्र वर्वर्तीति, नास्मकीना रसिकशिरोमणयः ? न शस्त्रचिकित्सकाः ? सहैवैताभिर्विद्याभिरौपनिषद्यामाध्यात्मिकविद्यायामनुपमा एव वयमभूम । सा हि यत्र सोपाने पदमधात् तन्मनसाऽपि गन्तुमनीशा देशान्तरनिवासिन इति स्पष्टमेवोद्घोष्यते तैरेव । इदानींतना विज्ञानपक्षपातिनः सर्वत्र भ्रान्त्वा अनधिगततत्वा अपरोक्षीकुर्वन्तश्चाऽस्य महतो विश्वव्यापिनो विज्ञानतरोर्मोहलोभरसभरितं जगदुत्पीडनमेव महत्फलं, यदि किञ्चित् जगतः कल्याणकरं सर्वसुखावहमस्ति भुवने सा शान्तिदान्त्युपबृंहिता निखिललोकजीवातुरात्मविद्यैव । तां विना पुरुषः प्राप्तुमेव नेष्टे प्राप्तव्यम् । तत्तादृशी वरेण्या विद्यास्मानेव वृणुते न केवलं ज्ञानोक्तं आसु विद्यासु कलास्वेव । आचारव्यवहारविषये सर्वोत्तरा एव वयमभूम । न केवलं सर्वोत्तराः अन्येषां मानवानां शीलादिशिक्षका अप्यभवाम । यथोक्तं मनुनाः—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥इति॥

अस्माभिरेव राज्यधूः क्षत्रकुलप्रसूतं कंचनाग्रे कृत्वा निरूह्यते स्म । अस्माकमुपरि न राज्ञामाज्ञा प्रभवति । 'राजा सर्वस्येष्टे ब्राह्मणवर्जम्' इति गौतमीयवचनमिमर्थमुपोद्बलयति । न शारीरो ब्राह्मणदण्ड इति शारीरो दण्डो निषिद्धोऽस्माकम् । राजसूयेऽभिषेकप्रकरणे, राजानमभिषिच्य जनेभ्यस्तत्परिचयदानाय प्रवृत्तो मन्त्र एवं वदति—"एष वो भरता राजा, सोमोऽस्माकं ब्राह्मणानां राजा" इति ।

अस्मास्वेव यथेष्टवक्तृतां नियम्य कस्मिंश्चिच्छास्त्रीये नियमविशेषे स्थित्वा वेदाध्ययनाध्यापनातद्व्याख्यानादिपरिपाटी सुग्रथिताऽऽसीत् । अस्मत्प्रवर्तितसभ्यता संस्कृतिर्वा लोके सर्वैरादियते स्म । इदानीमपि महासमरसमाप्त्यनन्तरं यदि किंचन लोकतन्त्रं सर्वजनहितकरं स्थापनीयं तत् शान्तिदान्त्यादिसमलंकृतां आध्यात्मिकविद्यैकभित्तिमवष्टभ्य निर्मितां भारतीयसभ्यतामेवं निदानीकृत्य स्थाप्येत इति निरधारि विचारशीलैः पाश्चात्यैः । परं कालेन हतसाधनाश्शनैः शनैस्सर्वस्मादपि साध्यात् पर्यभ्रश्यामहि । केचिदस्मान् कथयन्ति—कीरवत् गिरमेकरतिमेव चिरकालाभ्यां गृणन्ति । त्यक्तरसानालपन्ति । अलोकज्ञान्

ब्रुवन्ते । परमेतदसाधु । बहवोऽप्यास्माकीनास्त्यक्तैषणात्रया लोकहितमाचरन्तोऽद्यापि परिदृश्यन्ते इति नाऽविदितं तेषाम् । इदमपि च तेभ्यो निवेदयितुमीहामहे—यदस्माभिरतिकृच्छ्रगतैरपि निस्साधनैरपि कथंचिदियं विद्या न पर्यपालयिष्यताद्ययावत् तर्हि कीदृशी मूलोच्छित्तिरभविष्यत्, मूलस्यैवाभावे कं वा महावृक्षमारुह्य शाखाचंक्रमणं पल्लवाग्रग्रहणं भवितुमर्हतीति भवन्त एव विभावयन्त्विति । किञ्च येऽस्मासु दोषमारोपयन्ति—पण्डिता हि अधीतमध्यापितमर्जितं यशः इत्येतावतैव परितृप्ताः ततः परं नास्माकं कर्तव्यमस्तीत्यभिमन्वानाः किञ्चिदप्यकुर्वाणास्सुखमासते । तत्प्रयुक्तमेवेदमिदानीं भाषाया अनभिवर्धनमचतुरस्रता वेति । सत्यमिदम् । परं वचनमिदं भारतीयान्प्रत्यांग्लसाम्राज्योक्तिमनुसरति--तर्हि निस्साधनान् सर्वतस्संकुचितहस्तान् पुरः कृत्वा क्षीणशक्तिकांश्चाद्योच्यते—भारतीया महतोऽस्य साम्राज्यस्य धुरं वोढुं सर्वथा न प्रभवन्तीति निस्संकोचं वदन्ति । धर्मनिर्णयादौ अनधिगतास्मदीयधर्मस्वरुपा एव प्रभवंति । अधिकरणधर्मदायादिनिर्णायकः कश्चिदासीत्, सोऽपि ततः प्रच्यावितः कालेन । किमधिकविवरणप्रयासेन । यत्र विद्यालयादौ अध्यापनादिकार्योयांग्लभाषाविदां पञ्चाशद्रूप्यकाणि, तत्रास्माकं पञ्चपाण्येव कृच्छ्रलभ्यानि । धर्मशास्त्रादिषु विषयान्तरे चाऽस्मत्त एव द्वित्राण्यक्षराणि गृहीत्वा तान्यांग्लभाषया संयोज्य यथेष्टं परिक्रमन्ते । तत्र सर्वत्राप्यस्माकमौदार्यं मंसास्यमौदासीन्यमेव वा कारणम् । प्रथमतस्तद्दूरीकरणमस्माकं करणीयम् । मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति । अनन्तरमैकमत्यं तत्तादृशं संघटनीयं यत् परैः परकीयैर्वा बहुप्रयतमानैरपि न विघटनीयं भवेत् स्वकार्यं च साधु संपादयेत् । सर्वत्र प्रसारो गैर्वाण्याश्शास्त्राणाञ्च यथा भवेत्तथा प्रयतनीयम् । केचित्तु पाठप्रणालीमेव सर्वथा विपरिवर्तयितुमीहन्ते । परं सर्वैर्दृढनिधेयं कस्यामप्यवस्थायां शास्त्रपरिवर्धनकारणं शास्त्रार्थप्रणाली न परित्यक्तव्येति । तलस्पर्शी पाण्डित्यं च साधु संरक्षणीयमिति च । यदि वयं ततः किंचिदपि पश्चाद्गच्छेम तर्हि कालेन कियताऽपि गजाश्वविनिमयन्यायेन रिक्तहस्ता एव शिष्येमहि । अतस्तामनुतस्सृजद्भिरेव यतितव्यं दैव्या वाचो विवृद्धये । समयेऽत्रावश्यस्मर्तव्यं स्मारयन्नहं मन्ये न प्रकृताद्दूरं गत इति । अयं च स विषयः—अस्मदध्यक्षमहोदयाः श्रीमन्तो महामहोपाध्यायाः गिरधरशर्माचतुर्वेदास्स्वमायुस्सर्वमप्येतदर्थमेव समर्पयन् यतन्ते च सर्वप्रकारोन्नत्या अस्या इति कियदिदं प्रमोदस्थानम् ।

विषयेऽत्र दिङ्मात्रमुपदर्शितम् । नेतः परं कालयापनेन वृथां टाल्यते मया । इतोऽप्यधिकं वक्तव्यं तद्विवरेणाऽस्माननुगृह्णीयुः, समीचीने पथि नयेयुरानयेयुरस्यास्तपस्विन्या भाषायाः प्राक्तनं परमं स्थानं, प्राचीनां चाऽस्माकीनां संस्कृतिं सभ्यतां वाऽनुपमामिति सविनयमनुनयन् नरम्यन्ते सूनृतां स्वागतवाचं सकृदुचिवानेतावतैव विरमामि ॥

श्रीहरिः ।

संस्कृतपाठशालासु पठन-पाठनपद्धतिः ।

(ले० पुरुषोत्तमशर्मा चतुर्वेदः, साहित्याचार्यः, शुद्धाद्वैतालङ्कारश्च,
धर्मोपदेशकः, संस्कृताध्यापकश्च, राजकुमारविद्यालयः
(मेयोकालेज), अजमेर)

(१)

साम्प्रतिकी संस्कृतशिक्षा

न खलु विशेषतो विनिवेदनीयमिदं विदितवेदितव्यानां विदुषां पुरतो यदियं महामहर्षिभिर्महितापि, दार्शनिकशिरोमणिभिः कपिल-कणाद-गौतम-पतञ्जलिप्रभृतिभिरुत्तमाङ्गेनाभ्यर्हिताऽपि, व्यास-वाल्मीकि-भास-भारविभवभूति-कालिदास-भर्तृहरि श्रीहर्षादिभिरनिशमनर्घ्यानर्घ्यरत्नराशिभिरभिपूजितपदपाथोजाऽप्यमरसरस्वती साम्प्रतं समयविपर्ययेण वा, तत्सुतानामस्माकं विवशतया वा, शिक्षाया धनार्जनैकप्रयोजनतया वा, आध्यात्मिकेषु भक्तिज्ञानादिविषयेष्वनत्यादरेण वा, प्रतीच्यसभ्यता-विज्ञानादिचाकचक्येन भारतीयानां चमत्कृतलोचनतया वा, दारिद्र्यदुर्विलसितहेतुकेन परसेवामात्रप्रवणत्वेनाध्ययनाध्यापनप्रचारादिष्वभिमतज्ञानामनवसरग्रस्ततया वा, न केवलं नोद्वहति प्रचारप्राचुर्यम्, न केवलं नाधिकरोत्यतः पूर्वं सर्वथाधिकृतमपि भारतीयराष्ट्रभाषाभावम्, न केवलं नाद्रियते दार्शनिकैः, न केवलं न विज्ञायते वैज्ञानिकैः, न केवलं न काम्यते कविकुलैः, न केवलं नालंक्रियते ललिततमलेखैर्लेखकमहोदयैः, किन्तु न दीयते पदमप्यस्यै विविधेषु विद्यालयेषु, विरुध्यतेऽस्याः प्रचाराचरणमपि, व्यपदिश्यते मृतेति दुरभिधानेन परोलक्षेषु तदुपजीविषु विद्यमानेष्वपि, तिरस्क्रियन्ते चात एवैतस्याः सेवका अपि । अपि नामास्मिन् विषये विचिन्तितं दरविनिमीलितनयनमुकुलैरस्याः प्रणयिभिरस्माभिः ? विचिन्तितं चेदवश्यमेव निदानमस्यैतस्य दुरभिभवस्यान्वेषणपथमवतीर्णमेव स्यात् ।

तत्र यद्यपि सर्वप्रथमं च कारणं राजाश्रयाभावो दृष्टिपथेऽवतरति, सत्यं चैतदुचितं चापि, तथापि भवेदेव तथाविधमितरदपि कारणं यदिह पुराकाले संस्कृतविदुषां सत्यपि सर्वप्राधान्ये सम्प्रति तेषां सर्वोपेक्षणीयत्वं संपादयति । विषयेऽस्मिन् जनेनानेन भूयो भूयोऽनुभूय विचारचतुरैर्विचक्षणमहानुभावैः सह विमृश्य च यत् किञ्चिद् विज्ञातम् तत्प्रतीकारप्रकारश्च परामृष्टस्तदेतद् द्वयं प्रेक्षावतां पुरस्तादुपन्यस्यते, आशास्यते च सहृदयाः सुधियः सुधीरं समीक्ष्यात्र तथा किमपि निर्णयेयुर्यथा निराश्रयतया प्रचारस्यल्पाल्पतामुपगच्छन्तीयं सुरसरस्वती कथमपि पुनरुज्जीवितुं प्रभवेत् ।

तदिदं द्वितीयं सर्वप्रधानं कारणमस्मदीयपाण्डित्यस्य लोकानुपयोगितैवेत्यत्र नास्त्यंशतोऽपि नः संशयः । प्रतिपादयिष्यामश्चैतदुपरिष्टाद् यत् कथमिमे वयं प्राक्तनकाले स्वच्छसलिलसंभृताः सलिलाशया इव सर्वोपयोगिनोऽभूम,

सतृष्णा च जनताऽस्मानुपागच्छन्त्यदृश्यत, कथं चेद्,नीं पथिकैरमितहिमानीव सुदूरपरित्यक्ता रजताचला इवाराज्ञनचाकचक्यमावहन्तोऽपि समीपमागतानां जाड्यमेव निदर्शयामो विरक्तिभाजनतां चोपयामः।

तथाहि—छान्दोग्योपनिषदि सप्तमाध्यायारम्भे नारदेन 'अधीहि भगवः' इत्यनुयुक्तः सनत्कुमारो लौकिकविद्यानभिज्ञस्यात्मविद्योपदेशानर्हतां मन्यमानः स्पष्टमेवावोचत् 'यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामी' ति। अब्रवीच्च ततो नारदः "ऋग्वेदं भगवोऽध्येमि यजुर्वेदम्, सामवेदम्, अथर्वणं चतुर्थम्, इतिहास-पुराणं पञ्चमम्, वेदानां वेदम्, पित्र्यम्, राशिम्, दैवम्, निधिम्, वाकोवाक्यम्, एकायनम्, देवविद्याम्, ब्रह्मविद्याम्, भूतविद्याम्, क्षत्रविद्याम्, नक्षत्रविद्याम्, सर्वदेवजनविद्यामेतद् भगवोऽध्येमि" इति। अत्र ह्यूनविंशतिर्विद्या नामभिरेव निर्दिष्टाः, या ह्यसौ नारदः स्वस्मृतिविषयत्वेन स्वीकरोति, ततः परा अपि काश्चन स्युर्या अध्ययनमात्रविषयाः स्युर्न स्मर्यन्ते स्म, यतोऽअयमध्येमी'त्येवोक्तवान्, न पुनरधीता इति। सर्वस्याप्यध्ययनविषयस्य वर्त्तमानकालिकस्मरणविषयत्व-विरहः सर्वजनसिद्ध इति तदध्ययनस्यापि विषयस्ततो भूयानेव स्यादित्यत्र नास्त्येव निवेदनीयम्। अथवा माभून्नाम तदीयज्ञानप्रसरस्ततोऽधिके विषयजाते, तथापि संदर्भेणैतेन तद्युगोद्भवानां विविधलौकिकविद्याभिज्ञत्वं तु स्पष्टमेव परिज्ञायते।

याज्ञवल्क्यस्तु धर्मस्थानमात्रनिरूपणेऽपि—

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

इति पुराणादिदशोपबृंहणोपकारकसंहितानां वेदानां तथात्वमाह। विष्णुपुराणे पुनः पूर्वोक्ता एव विद्या भिन्नक्रमेण विनिर्दिश्य

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव ताः॥

इत्येवं लोकोपकारकविद्याचतुष्टयसहितानां तासामष्टादशत्वं प्रतिपादितम्। कामन्दकस्तु

आन्विक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम्॥

कथंचेदित्थम्—

आन्वीक्षिक्याऽऽत्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ।
अर्थानर्थौ तु वार्त्तायां दण्डनीतौ नयानयौ॥

इति साङ्ख्य-न्यायो-भयमीमांसादिरूपात्मान्वीक्षणसाधनभूतान्वीक्षिक्याऽऽत्मविज्ञानम्, त्रय्या च धर्माधर्मज्ञानमिति पूर्वार्धेन निःश्रेयससाधनभूते विद्ये निरूप्योत्तरार्धेन लोकोपकारिके वार्त्तादण्डनीती न्यरूपयत्।

कविकुलगुरुस्तत्रभवान् कालिदासोऽपि रघुविनयने

धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुर्णवोपमाः।
ततार विद्याः........................(र. वं. ३।३०)

इति तदेतद्विद्याचतुष्टयमेव जिज्ञास्यत्वेन प्रतिपेदे। श्रीमद्भागवते भगवतोः श्रीरामकृष्णयोः शिक्षामुपक्रम्य

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः॥
सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम्॥
(१०।४५।३३-३४)

इति विद्या विनिरूप्य

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः

इति कला अपि शिक्षणीयत्वेन निरूपिताः।

तदेवं श्रुति-स्मृति-पुराण-नीतिशास्त्र-साम्प्रदायिक कविप्रभृतिभिः सर्वैरपि न केवलं निःश्रेयससाधनभूतानामेव किन्तु लोकोपयोगिसर्वविधविद्यानामपि जिज्ञास्यत्वं सर्वसंमत्या स्वीकृतमित्यपाणिपिहितम्। भगवती श्रुतिस्तु देवर्षे-नारदस्यापि गन्धयुक्ति-नृत्य-गीति-वाद्य-शिल्पादीनां विज्ञानमपि प्रतिपेदे, यानि कदाचिदेवाधुनिकाः पण्डितपुङ्गवाः श्रोतुमप्यनुमन्येरन्।

वस्तुतस्तु तदिदमुचितं चावश्यकं च। यतः पुरुषार्थचतुष्टयसिद्धिर्हि पुरुषजीवनस्य लक्ष्यम्। तत्र यद्यपि प्राधान्यं मोक्षस्य, तथापि "अनेकजन्म-संसिद्धस्ततो याति परां गतिम्।" इति भगवद्गीतोक्तरीत्या न तस्य सुलभत्वं सर्वजनाधिगम्यत्वं चेति त्रिवर्गसिद्धिरेव सर्वजनोपयोगिनी। नैतावदेव, किन्तु "नानुभूय न जानाति नरो विषयतीक्ष्णताम्" इति श्रीमद्भागवतोक्तरीत्या मोक्षोप-योगिनी, मोक्षप्राप्तिपर्यन्तजीवनधारणाय चापेक्षिता चेत्यप्यकामैरप्यभ्युपेयमेव। एवं चैषा पुरुषार्थसिद्धिः पूर्वोक्ताभिरेव विद्याभिः संपादयितुं शक्येत्यप्यविवादमेव। आसीच्च सोऽपि समयो भारतवर्षे यदा पुरुषार्थचतुष्टयप्राप्तये प्रयतमानाः परां-श्चापि प्रेरयन्तः पण्डिताः सर्वजनोपयोगिनः सर्वसमादृताश्चाभूवन्नित्येतन्निःसंकोचं प्रतिपद्यन्त एव पुरातत्त्वविदः पाश्चात्यपण्डिता अपि। तदेतत् प्रपञ्च्य समय-यापनं निरर्थकमेव।

अथ साम्प्रतिकी संस्कृतशिक्षा समीक्ष्यताम्। अद्यत्वे हि संस्कृतविदुषां प्रधानं क्षेत्रं वाराणस्येव। तत्र चेदानीं न्यायव्याकरणे एव प्राधान्येनाध्याप्येते, तत्रापि परमं प्राधान्यन्तु नव्यन्यायस्यैव। यदि सुबहुश्रुतोऽपि विद्वान् नव्यन्या-यशैल्या स्वीयं वक्तव्यं न परिष्कर्तुं शक्नोति, तर्हि तदीयो विमर्श एभिः कर्णेऽपि न

क्रियते, का कथा पुनस्तस्य विद्वत्सु परिगणनायाः । अत एव तादृशपरिपाटी पण्डितानामाधुनिकानां भूयस्सुशास्त्रार्थेष्वपि स्वपक्षस्थापनारहितया परपक्ष-खण्डनैकप्रवणया वितण्डया निग्रहस्थाने नयनमेव दृष्टिपथमवतरति सूक्ष्मेक्षिकया निरीक्षमाणानाम् ।

यद्यपि न्यायव्याकरणयोरेषां सूक्ष्मेक्षिका तदवगन्तॄणां मनोहारिणी चौत्सुक्यवर्धिनी चेति निः संशयं वक्तुं शक्यते, किन्तु किमेभिस्ततो निस्सारितं सारम् । तथा हि प्रथमतस्तु यदि वस्तुबुद्धया विचार्येत तर्हि गौतमप्रणीतं न्यायशास्त्रं न पदार्थशास्त्रम्, किन्तु तत्त्वविमर्शसाधनभूतं तर्कशास्त्रमेव । तच्च यथा पारमार्थिके तत्त्वविमर्शे उपयुज्येत तथैव परिष्कारपरिपाटीपरिहीणं लौकिके-षु न्यायाधिकरणादिष्वप्युपयोक्तुं शक्यते । संजायेत तेन सुमहांल्लाभो जनतायाः, भारतीया वस्तुविवेचनशैली च सपक्षमुपतिष्ठेताधुनिकतार्किकम्मन्यानाम् । किन्तु केवलं नव्यन्यायरीत्या वाग्जालप्रसारण एवास्मामिस्तदेतदुपयुज्यते । नैतेन निः श्रेयसाधिगमो भवितुमर्हति, न च लौकिकसत्यासत्यविवेचना ।

न च तत्र निर्दिष्टाः षोडश पदार्थाः परैः कणादनिर्दिष्टायां सप्तपदार्थ्या-मन्तर्भाविता इति तस्य पदार्थविज्ञानशास्त्रत्वं स्वीक्रियतामिति वाच्यम् । सर्वस्यापि प्रापञ्चिकपदार्थजातस्य कणाददर्शने सप्तपदार्थ्यबहिर्भूतत्वेन तथा कर्त्तुं सुकरत्वात् । नैतावन्मात्रेण न्यायशास्त्रं काणाददर्शने संमिश्र्य वस्तुविद्यात्वे-न प्रत्यभिज्ञापयितुं शक्यते ।

अथ यदि पदार्थशास्त्रमेवेदं मन्येत, तथापि तस्य न पदार्थलक्षणमात्र-विचारणे समाप्तिरुचिता । यतो गोर्लक्षणमविदन्तोऽपि गोपाला एव गोपदार्थ-तदुपयोगविदः स्वीक्रियेरन् जनतया, तदुभयतत्त्वज्ञत्वात्, न तु गोलक्षणनिर्मा-णाय भूयो भूयः प्रयतमानाः पण्डिताः अत एवेदं न्यायशास्त्रमदो वैशेषिक-शास्त्रं चोभयमपि क्रमेण लाजिक (Logic)-सायन्स (Science) रूपेण परिणमनार्हमपि लक्षणैकचक्षुर्भिरस्माभिर्लोकानुपयोगितां नीतामिति केन वा परिणामदर्शिना तत्त्वज्ञेन न स्वीक्रियेत ।

अथ सेयमेव दशा व्याकरणस्यापि । तथा हि भगवान् पतञ्जलिः प्रारम्भ एव व्याकरणमहाभाष्यस्य शब्दानुशासनं प्रयोजनं "रक्षोहागमलध्वसंदेहाः प्रयोजनम् ''..........'' इत्यादिना सुमहता संदर्भेण वेदोपकारकत्वमेव प्रति-पादयाम्बभूव । कैयटोऽपि च व्याकरणस्य वेदद्वारैवोपयोगिताम् "पारम्पर्येण पुरुषार्थसाधनतामस्याहे''त्यनेन वाक्येन स्पष्टतया प्रतिपेदे । किन्तु सुमहदस्माकं दुर्भाग्यम्, यदाधुनिका वैयाकरणशिरोमणयोऽपि कदाचिदेव वेदज्ञानेऽस्योपयोगं विदध्युः, यतः सर्वेषामपि साम्प्रतिकव्याकरणाचार्याणां शिक्षा पाणिनिसूत्रेष्वर्ध-मात्रामात्रस्यापि लाघवं कर्त्तुं न शक्यत इत्यत्र, दीक्षितेन यत् किमपि लिखितं तदेव सर्वांशेन साधु, मुनित्रयमतं केवलमनेन वा नागेशेन वा सम्यक् परिज्ञातम्, स्वतन्त्रं चेदं दर्शनमित्यत्रैव परिसमाप्नोतीति नातिरोहितं विदुषाम् । आसीदिद-मुपयोगि पाणिनि-सूत्रप्रचारकाले सिद्धान्तकौमुदी प्रचारकाले चेति तैस्तथा

विहितम्, किन्तु साम्प्रतम् कस्तस्योपयोग इति न तिरस्क्रियतां विचारसरणेः । सिद्धान्तकौमुद्याः, अपेक्षितस्य तद्विवरणस्य चाध्ययनं सुतरामुपयोगीत्यत्र कस्तावद् विद्वान् विप्रतिपद्येत, किन्तु पाणिनिसूत्राक्षरविचारणमात्रे, दीक्षित-नागेश-लेखसमर्थने च जीवनयापनं धर्ममोक्षयोः साधनमिति कस्तावच्छ्रद्दध्यात् ।

अथेतरेष्वप्यध्याप्यमानविषयेषु निःक्षिप्यतां दृष्टिः । साहित्यशास्त्रं हि सर्वविधकविकर्ममर्मविज्ञानायैवाविष्कृतम् अत एव तत्र भाषाभेदमनादृत्य संस्कृतपद्यानीव प्राकृतपद्यान्यप्युदाहृतान्येव काव्यप्रकाशकारादिभिः । किन्तु साम्प्रतिकः साहित्याचार्योऽपि संस्कृतभाषायां येषु दोषेषु दृष्टेषु नासिकासंकोचमञ्चति तत्सजातीयानेव दोषान् हिन्दीभाषायां विदधानो दृश्यते, न च हिन्दीपद्यानि विवरीतुमप्येष यथावच्छक्नोति । तदेवं साहित्येऽपि भूयांसः पुस्तकपाठका एव दृष्टिपथमायान्ति, न पुनः श्रुतमात्र एव पद्ये तत्तत्काव्यवृत्ति-प्रयोजकव्यङ्ग्यालङ्कारादितत्त्वविदः ।

सेयमेव दशा ज्यौतिषस्य । ज्यौतिषं हि ज्योतिर्विषयकं विज्ञानम् । किन्त्वेते महाशया आचार्यपर्यन्तमधीयाना अपि च परिचिन्वन्ति ते खगोलस्थानि ज्योतींषि, कुतः पुनरेते विद्युरस्मिन् विषये नवनवमन्विष्यमाणं वस्तु, कुतश्चास्योपयोगं विदध्युः ।

अत्युपयोगिन्यायुर्वेदेऽपि सेयं दुरवस्था दरीदृश्यते । वैद्यमहाशयो विद्यालये औषधालये वा विश्राम्यन्नेवोद्ग्रायतामार्त्तानां संपादयितुं प्रयतते । नैष परिचिनोत्योषधीः, नापि नवनवानुत्पद्यमानान् विकारान् । अत एव सुविमृश्य निरूपितोऽप्यृषीणामौषधोपचारो न तथा साफल्यमधिगच्छति यथाऽस्यास्माकं शास्त्रेषु दृश्यते गौरवम् ।

परमार्थसाधनस्य प्रधानसाधनत्वेन स्वीक्रियमाणानामतिमात्रश्रद्धया पञ्चमवेदत्वेन गृह्यमाणनामधेयानां पुराणेतिहासानां धर्मशास्त्रादीनां च सोपपत्तिपाठने तु प्रत्यक्षमेवास्माकमसामर्थ्यं जागर्ति । संस्कृतज्ञा हि यथा व्याकरणादीनि पंक्तिशो निरवकरीकृत्य पाठयितुं शक्नुवन्ति न तथा वेदपुराणेतिहासधर्मशास्त्रादीनि । अत एव वयं समुपस्थिते धर्मसंबन्धिनि प्रश्ने परिष्कारादिना प्रतारयन्तो वा गजनिमीलिकामाचरन्तो वा दृश्यामहे ।

मान्याः मनीषिमहानुभावाः, दिङ्मात्रमेवैतत् । पौरोभाग्यमयमाचरतीति मन्यमानानां लेखकः कोपभाजनतामेव नेयादिति विरम्यते ऽस्माद्दुरालोचनात् ।

२

अथ कीदृशी शिक्षाऽपेक्षिता ।

तदेवमधस्तात् प्रदर्शितया दिशा विचारे विधीयमाने साम्प्रतिक-संस्कृत-शिक्षायामिमे दश दोषा दृष्टिविषयतामुपयान्ति—(१) एकदेशिता (२) व्यवहारानभिज्ञता (३) लक्षणैकचक्षुष्कता (४) वाग्जालप्रसारणमात्रपाटवप्राप्तये

प्रयत्नः (५) परपक्षखण्डनैकप्रवणता (६) तत्त्वज्ञताभावः (७) स्वल्पफलानां चिरकालपाठ्यग्रन्थानां समावेशः (८) भारतीयधर्म-संस्कृतीतिहासाद्यावेदकग्रन्थानामप्रवेशः (९) कलादिसहयोगिविषयशून्यता (१०) प्रारम्भिकशिक्षायाः काठिन्यं चेति।

तदपनयाय विविधोपायप्रदर्शनमपहायेह महामहोपाध्यायश्रीगिरिधरशर्ममहानुभावानामनुरोधेन जयपुरे संमिलितयैकया लघुसमित्या, यस्यास्मिन् विषये रसवद्भ्यः कतिपयजयपुरराजकीयविद्यालयाध्यापकेभ्योऽतिरिक्तः पङ्क्तीनामासां लेखकोऽप्यासीत्, निर्णीतः पाठ्यक्रमस्तदनन्तरसमुदितविचारानुसारिकिञ्चित्परिवर्त्तनसहितः पण्डितपरिषदोऽस्याः समक्षं समुपस्थाप्यते, आशास्यते च देशकालादिविशेषं विदन्तस्तत्रभवन्तः सुधियः सुधीरं विमृश्य, सत्यामावश्यकतायां समुचितं परिवर्त्तनं च विधाय, निजोररीकारप्रदानेन प्रचारानुग्रहेण च परिश्रममिमं तथा सफलयेयुर्यथा भगवतीयममरभारती पुनरपि यथापूर्वमुज्जीवितुं प्रभवेत् उद्घोषयेम च भूयोऽपि भगवन्मनुमतमनुसृत्य ससंमानम्—

एतद्देशसमुत्पन्नसंस्कृतज्ञसकाशतः।
प्रावीण्यं प्राच्यविद्यासु प्राप्नुयुः सर्वमानवाः॥

पाठ्यक्रमः

१—संस्कृतभाषाध्ययनप्रयोजनानि

१—भारतीयसंस्कृतिसंरक्षणम्, २—भारतीयविद्यानामतुलनिधानस्य, भारतीयविदुषामनुपमसूक्ष्मविवेचनशैल्याश्च संरक्षणप्रचारौ, ३—जनतायां धार्मिकरुचेरुत्पादनम्, धर्मज्ञानप्रसारः, आध्यात्मिकशक्तिविकासं प्रति प्रगतेः प्रयासश्च, ४—यथार्थेतिहासनिर्माणम्, ५—प्राच्यपाश्चात्योभयविधशिल्पकलाविज्ञानादीनां तुलनात्मकमध्ययनम्, अन्वेषणद्वारा तन्न्यूनतानां त्रुटीनाञ्चापनयनप्रयत्नश्च, ६—भारतीयधर्मदर्शनादिषु क्रियमाणानामाक्षेपाणां समुचितः परिहारः, ७—व्यावहारिकजीवने सौम्यता-सारल्ययोर्भारतीयविनयशिष्टाचारयोश्चादर्शोपस्थापनम्।

२—जीविकासाधनानि

१-अध्यापनम्, २-अन्वेषणम् (Research) ३-उपदेशः, ४-कथावाचनम्, ५—संस्कृतग्रन्थानामन्यभाषास्वनुवादः, आवश्यकग्रन्थानां संस्कृतभाषायां चानुवादः, ६—कर्मकाण्डप्रयोगः, ७—अनुष्ठानानि, ८—ज्योतिर्विद्या, ९—भैषज्यम्, १० पुस्तक-सामयिकपत्रादिसंपादनम्, ११—अभिनवग्रन्थप्रणयनम्, १२—मुद्रणपत्रसंशोधनम् (Proof-readership), १३ समुचितक्षेत्रेषु (यथा क्षत्रियराज्येषु दानविभागाध्यक्षता, देवस्थान-भगवन्मन्दिराद्यधिकार इत्यादि) योग्यपद-प्राप्तिः इत्यादयः। *

* तालिकायामस्यां कलाभिज्ञता-कृषि-व्यापारादयोऽपि निवेशयितुं शक्यन्ते। एतेनेदमभिप्रेतम्—यत् संस्कृतज्ञाः संस्कृताध्ययनेन सह तथैव कला-कृषि-व्यापारादिविषयेषु नैपुण्यमासादयेयुर्यथाऽऽङ्गुलपाठशालासु वैकल्पिकविषयत्वेनाभ्यस्यमानेषु Drawing, music, agriculture, commerce प्रभृतिषु। विषयाश्चेमे संस्कृतपाठशालास्वप्यध्याप्येरन्। भारतस्य स्वाधीनतावसरेऽस्माकं पूर्वजैस्तदेतत् सर्वमनुष्ठितमेव। संगीतविद्या तु सुकथोपदेशादिस्वप्युपयोगिनीत्यतिरोहितमेव।

३–पाठ्यविषयाः

प्रथमा

(सर्वविषयसाधारणेयं परीक्षा)

(I) संस्कृतम्––सूत्रग्रन्थाध्ययनमन्तरैव संस्कृतगद्यपद्ययोर्यथाविधि-वाचन-लेखने, अनुवाद-वाक्यरचनाद्यभ्यासश्च ।

(II) मातृभाषा—साधारणगद्यपद्ये ।

(III) वङ्ग-तैलङ्ग-ग्रन्थाक्षरपरिचयः ।

(IV) गणितम्––मिश्रभागान्तम्, व्यवहारोपयोग्यायव्ययादिपरिज्ञानं च ।

(V) धर्मः––(मातृभाषायाम्) मनूक्ता दश सामान्यधर्माः, शौचाचार-सन्ध्या-स्तोत्रादिकम्, प्रमाणावताराचार्यादिपरिचयः, पञ्चाङ्गावलोकनं च ।

(VI) इतिहासः––प्राक्तन-नूतनेतिहासकथाः ।

(VII) भूगोलम्––भूगोलीयपरिभाषा, पञ्चमहाद्वीपपरिचयः, राजनैतिक-व्यापारिक-धार्मिकदृष्टिभिर्भारतस्य संपूर्णं परिज्ञानम् ।

(VIII) वैकल्पिकविषयाः––(क) वेदः––पुरुषसूक्तम्, साधारणकर्मोपयोगि-मन्त्राश्च । (ख) चित्रकला । (ग) संगीतम् (स्वरसाधनामात्रम्) । (घ) आङ्गलभाषायाः प्रारम्भिकज्ञानम् । एष्वन्यतमं किञ्चित् ।

मध्यमा ।

(I) संस्कृतम्––(क) व्याकरणम् (मध्यकौमुद्या अनवरं किञ्चित्) (ख) साहित्यम् (प्राचीनार्वाचीनोभयविधगद्यपद्ययोस्तदुपयोगिसाधारण-च्छन्दोलङ्काराणां च परिज्ञानम्, शाकुन्तलादिसममेकं नाटकं च ।) (ग) संस्कृतभाषातो मातृभाषायां मातृभाषातः संस्कृतभाषायामनु-वादे नैपुण्यम्; निबन्धरचना च ।

सूचना––शिक्षायामस्यामिदमवश्यमवधेयम्—यच्छात्रस्य विविध-शास्त्रप्रवेशयोग्यता, उभयविधानुवादयोग्यता च पूर्णतया संपद्येतेति ।

(II) मातृभाषा––गद्यपद्यसाहित्यस्य यथेष्टपरिचयः, निबन्धलेखाभ्या-सश्च ।

(III) धर्मः––वर्णधर्माः, आश्रमधर्माः, साधनधर्माः (तत्तत्संप्रदायमनुसृत्य), तीर्थव्रतोत्सवादीनां साधारणतया यथेष्टः परिचयश्च ।

(IV) इतिहासः––वेदोपनिषत्पुराणप्रतिपादितविशिष्टब्रह्मर्षि-राजर्षीणां परि-चयः, प्राच्यमध्ययुगीयराज्य-समाज-धार्मिकव्यवस्थानां यथार्थबोधः, देशदुर्दशाकारणविवेचनं च ।

(V) भूगोलम्—भौगोलिकसिद्धान्तानां प्राचीनार्वाचीनदेशादीनां परिचयश्च।

(VI) विज्ञानम्—आरम्भिकः परिचयः।

(VII) वैकल्पिकविषयाः—(क) न्याय-साहित्ये, (ख) वेदः, (ग) ज्यौतिषम्, (घ) आयुर्वेदः, (ङ) आङ्गलभाषा (मिडिलक्लासपर्यन्तम्) (च) चित्रकला (छ) संगीतम्।

उच्चशिक्षा

(शिक्षायामस्यां निम्न-लिखिता विषया निर्धारिताः, येष्वन्यतमं किमप्येकं परीक्षार्थिना ग्रहीतुं शक्यते) १—वेदः (क) कर्मकाण्डम् (ख) वैदिकतत्त्व-परिज्ञानम् २—व्याकरण-साहित्ये (३) नव्य-न्यायः (४) दर्शनानि (क) वैदिकदर्शनानि (ख) जैनबौद्धदर्शनानि (५) धर्मशास्त्रम् (क) स्मृतयस्तन्त्राणि च (ख) व्यवस्थोपयोगिनिबन्धाः (ग) उपदेशोपयोगी सर्वसंग्रहः (६) पुराणानि (७) इतिहासः (समाजस्य साहित्यस्य च) (८) ज्यौतिषम् (गणितं फलितं च) (९) आयुर्वेदः (१०) अर्थशास्त्रम् (कौटल्यादिप्रणीतम्) संपत्ति-शास्त्रं वार्त्ताशास्त्रं च (१२) भाषाविज्ञानम् (पाणिनीयपञ्चपाठीं निरुक्तादि चानुसृत्य) (१३) पदार्थविज्ञानम् (*Science*)।

सूचना—एतावदधीत्य शिक्षार्थी स्वस्वविषयेऽधिकृतः स्वीक्रियेत। विशिष्टयोग्यतार्थं परिगणितविषयाः पृथङ् निर्दिष्टाः। समयः—परीक्षास्वासु प्रत्येकं वर्षत्रयं पर्याप्तं स्यात्। तदेवं वर्षनवकानन्तरं यदि परीक्षार्थी कामयेत तर्हि कार्यक्षेत्रे प्रविशेत्, यदि तु विशिष्टयोग्यतां कस्मिंश्चिद्विषये वाञ्छेत्तर्हि वर्षत्रयं तस्मिन् विषये प्रयस्य प्रावीण्यमासादयेत्।

विशेषज्ञताविषयाः।

१—वेदः (क) पाठः (ख) प्रयोगः (ग) तत्त्वज्ञानम्। २—व्याकरणम्, ३—साहित्यम् (क) शास्त्रम् (ख) कवित्वम् (ग) नाट्यम्, ४—न्यायशास्त्रम् (क) शब्दखण्डम् (ख) अनुमानखण्डम्, ५—प्राचीनन्यायवैशेषिके, ६—सांख्ययोगौ, ७—वेदान्तदर्शनम् (क) शाङ्करम् (ख) रामानुजीयम् (ग) निम्बार्क-भास्करीये (घ) माध्वम् (ङ) वाल्लभम् (च) प्रत्यभिज्ञा (छ) यावद्वेदान्तानां तुलनात्मकमध्ययनम्। ८—भक्तिशास्त्राणि—भागवत-पञ्चरात्रादीनि। ९—पूर्वमीमांसा—१० जैनदर्शनम्—११ बौद्धदर्शनम् १२—प्राच्य-प्रतीच्यदर्शनानां तुलनात्मकमध्ययनम्। १३—स्मृतयः, १४—तन्त्राणि, १५—पुराणानि, १६—धर्मोपदेशकता, १७—

इतिहासः, (क) समाजस्य (ख) साहित्यस्य, १८—ज्यौतिषम् (क) गणितम् (ख) सिद्धान्तः (ग) फलितम्, १९—आयुर्वेदः (क) शास्त्रम् (ख) प्रयोगः। २०—शासन-पद्धतिः, २१—राजनीतिः, २२—जीविकाशास्त्रम् (वार्त्ता), २३—अर्थशास्त्रम्, २४—व्यवहारशास्त्रम् (Law), २५—कृषिः, २६—वाणिज्यम्, २७—पाशुपाल्यम्, २८-भाषाविज्ञानम्, २९—शिल्पविद्या, ३०—भौतिकविज्ञानम्, ३१-रसायनविज्ञानम्, ३२—मनोविज्ञानम्, ३३-प्राणिशास्त्रम्, ३४-वनस्पतिविज्ञानम्, ३५-भूगर्भविद्या चेत्यादयो यथायथं यथासंभवं निर्देश्यास्तच्छिक्षणाय शिक्षकादिकं च सति संभवे सज्जीकरणीयमित्यलमतिप्रपञ्चितेन ।

॥ श्रीः ॥

संस्कृत-पाठशालासु पठनपाठनपद्धतिः ।

निबन्धा—श्रीवृद्धिचन्द्रशर्मा शास्त्री, व्याकरण-धर्म्मशास्त्राचार्यः,
प्रो०—महा० संस्कृत-कालेज, जयपुरम् ।

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरंमुखे मन्महे किमपि तुन्दिलं महः ॥

आसन् तेपि दिवसाः, येषु महीमण्डलमण्डितायमानं भारतमिदं वस्तुतो भारतमेवासीत् । अत्रत्या ज्ञानविज्ञानशालिनो ब्राह्मणा भूसुराः परिगण्यन्ते स्म । राजतन्त्रेपि ब्राह्मणानामेव शास्त्रज्ञानां प्राधान्यं वर्तते स्म । वाणिज्य-व्यवसाय-कलाकौशलादिशिक्षणेपि तेषामेवासीदधिकारः । किं बहुना ब्राह्मणमन्तरा नासीत्कस्याप्यध्यापने हस्तक्षेपः । व्यवस्थाया अस्याः फलमेतद् भवति स्म, यत् सुदूरदूरदेशान्तरतोऽपारं पारावारं समुपलङ्घ्य अपरिमितं कष्टमनुभूयापि विद्याग्रहणाय अस्मानुपतिष्ठन्ते स्म द्वीपान्तरस्था जनाः । तस्मिन् समये देशस्यास्य आसीदेवैव संस्कृता भाषा, एता एव पाठशालाः, यासु शिक्षिता जना न केवलमस्मिन्नेव देशे गौरवभाजोऽभूवन्, देशान्तरेष्वपि स्वनामकीर्तिस्तम्भानरोपयन्निति पुरावृत्तमस्माकं साक्षि । को न जानीते, अनयैव भाषया, आस्वेव पाठशालासु शिक्षा गृह्णाना मानैकधना महर्षयः करतलामलकवद् ब्रह्माण्डपदार्थजातमवलोकयन्ति स्म । धर्म्मशास्त्रपारंगतो महाराजो मनुरस्मिन्नेव भारतभूखण्डे जनिंलेभे । भगवता द्रोणाचार्येण मन्ये न देशान्तरं गत्वा शस्त्रास्त्रविद्यासु पाटवमासादितम् । कामशास्त्रमध्येतुं वात्स्यायनेनापि न विदेशयात्रायातना सोढा । नीतिशास्त्रनिष्णातेन चाणक्येनापि एतद्देशीयपाठशालास्वेवाधीतम् । वक्तव्यस्यास्य अयमेवाभिप्रायो यद् भारतवर्षीयासु संस्कृत-पाठशालास्वेव भारतीयेभ्यो गुरुभ्य एव तैर्ज्ञानमर्जितमासीत् । किं बहुना, यद्देशप्रसूतः प्रत्येकं द्विजन्मा गुणानामागारमासीत् । नासीत् तादृशी काचिद् विद्या यया परिचितो नाभूद् भारतीयो भूसुरो विद्वान् । 'यद् वै मनुरवदत् तद् भेषज' मिति प्रमाणान्तरनिरपेक्षया श्रुत्या यस्य वचनस्य प्रामाण्यमुररीकृतम् स एव भगवान् मनुः किं वदतीति मनाग् निभाल्यताम्—दरमुकुलितदृशा महाभागैः ।

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति ।

किन्तु हन्त ! न हि भवन्ति सदा समानानि दिनानि । स एवायं देशः, त एव हि अग्रेजन्मानः, ता एव पाठशालाः, किन्तु क्व तज्ज्ञानगौरवम् ? न ता विद्यालयाः पाठशालाः, न तेऽग्रेजन्मानो ये सकलकलाप्रवीणाः, अद्यत्वे त्वस्माकं देशो ज्ञानोपार्जनाय परमुखमपेक्षमाणो ऽवलोक्यते । विद्यालया अस्माकं केवलं पुण्यालयाः परिगण्यन्ते । विद्यैकधनाः भूसुरास्तिरस्क्रियन्ते । संस्कृत-पाठशालासु

शिक्षमाणाः शिक्षिताश्च शिक्षितसमाजे न क्वचित् संमानमर्हन्ति । हन्त ! अनेहसि विपरीते किं न भवति विपरीतम् ? अवस्थामिमामवलोक्य कविकुल-गुरोः श्रीकालिदासस्यार्थगौरवा—उक्तिरियं स्मृतिपथमायाति—"नीचैर्गच्छ-त्युपरि च दशा चक्रनेमिक्रमेण" इति ।

आस्तां तावत् । सर्वमेतदवगतं विद्वत्तल्लजानाम् । किमनेन भूतस्मरण-रूपेण पिष्टपेषणेन । विचारणीयं तावदेतदेव, यज्जगन्मूर्द्धन्यस्य ज्ञानविज्ञानविद्यासु कुशलस्य देशस्यास्य ईदृशी दुरवस्था कथंकारं समजनीति । केवलं समयशिरसि दण्डपातनेन न नाम कार्यसिद्धिर्भविता । दोषान्तारण्यन्वेषणीयानि । किञ्चिद् विचार्यमाणं इदमेव दृष्टिपथमायाति यदस्माकं शिक्षादीक्षापद्धतौ बहूनि दूष-णानि संप्रविष्टानि, येन वयं तादृशा अपि एतादृशा संजाताः । अस्माकं शिक्षा-पद्धतौ कालक्रमानुसारं तादृशा दोषाः समागताः यैरस्माकं पठनपाठनपद्धति-सर्वथानुपयोगितां गता । गतं चास्माकं ज्ञानगौरवम्, न चास्मान् पृच्छति: कोपि वराटिकाभिरपि ।

अत्र केचित् प्रत्यवतिष्ठन्ते विचारचातुरीचतुराः—'न चास्माकं पठन-पाठनपद्धतौ दोषलेशोऽपि संप्रविष्टः । केवलं राज्याश्रयाभाव एव प्रचाराभावस्य कारणम्, गौरवाभावस्य च । यदि राज्याश्रयं वयं लभेमहि, तादृशमेव गौरवं प्राप्नुयामः' इति । सत्यं तेषां शेमुषीजुषां कथनमिदम् । मन्ये, राज्याश्रयमनुप-लभ्य न कापि शिक्षा तथोन्नतिं कर्तुं समर्था यथा तदाश्रयमुपलभ्य । किन्तु मान्याः, न केवलं स एव हेतुः संस्कृत-शिक्षायाः पश्चात्पदत्वे शेखरायते। अपि तु कालक्रमेण अनिवार्यतया समुत्पन्नानां दोषाणामपरिमार्जनमेव मुख्यतमो दोषो-ऽस्याः समुन्नतौ बाधक इति मन्मतिः ।

सैव खलु पठनपाठनपद्धतिश्चिरं प्रचलेत्, या हि ज्ञानशक्तिं विकासयन्ती क्रियापाटवमपि शिक्षयेत् । सैव च भवेद् मनुजसंघस्य कल्याणाय । तद्विपरीता च केवलं समययापनायैवेति शास्त्राणामस्माकं घण्टाघोषः केन वा न श्रुतः साक्षरेण "शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान्" इति । ये हि परलोकहितसाधनमात्रं शिक्षायाः फलं मन्यन्ते, मन्ये धर्मध्वजिनः सन्तोऽपि ते वस्तुतो वर्णाश्रमधर्मध्वंसका एवेति कटुसत्यं मे कृपया मर्षणीयम्। मान्याः ! केवलं परलोके मोक्षे वा शिक्षायाः फलं तदा धर्मार्थकामरूपः त्रिवर्गः केन साध्यतां नाम ? तस्मात् चतुर्विधपुरुषार्थसाधनीयं संस्कृता वागित्यवश्यं प्रतिपत्तव्यम् । सा हि चतुर्थाश्रमकृते परं वैराग्यं यथा शिक्षयति, तथा साम्रा-ज्यसंचालनाय राजधर्मानपि न विस्मरति । गृहस्थाश्रमस्य सम्यग् व्यवस्थित्यै समाजशास्त्रं कामशास्त्रं च यथा क्रोडे करोति तथैव प्रतिपदं विशुद्धान् सदाचारा-नपि न परित्यजति । विद्याप्रवणापि कलाविस्तारमक्षुण्णं रक्षति । किंवा अधिक-विस्तारेण, देशकालपात्रादिभेदेन यस्मिन् समये यस्याः शक्तेरुपयोगः आवश्यकः तस्याः सर्वस्या अपि विकाससामग्री यथोचितं संस्कृत-भाषामये साहित्ये नापूर्णतां भजते । किन्तु अद्यत्वे किं किं संस्कृतपाठशालासु पाठ्यते इति न

तिरोहितं विदुषाम्। ये हि विषया जनसाधारणोपयोगिनः सन्ति, तेषां तु तत्र कथैव न, पाठनं तु दूरापेतम्। "विद्या तु वैदुष्यमुपार्जयन्ती जागर्ति लोकद्वय-साधनाय" इति-अभियुक्तोक्तप्रकारेण ऐहिलौकिकाः पारलौकिकाश्चेत्युभयविध-विषया विद्यास्वन्तर्भूता वर्तन्ते। आस्ताम् द्वयम्, इह तु एकोऽपि लोकः साध्य-मानो न विलोक्यते हन्त! संस्कृतपाठशालासु एतास्वधीतवन्तः संस्कृत-पण्डिताः लौकिकज्ञानशून्या भवन्तीति किंवदन्ती न नाम सर्वथा न तथ्यतां भजते। संस्कृत-पाठशालासु विषयाणामेषां सर्वथा पाठनाभावात्। गणितसदृशे समुपयोगिनि विषयेऽपि न नाम पण्डितानां गतिः। बहूनां तु खलु पण्डितानामेष विश्वासो यद् यस्य गणिते गतिः न स व्याकरणं न्यायं वाऽध्येतुं प्रभवेत् कदाचि-दपीति। ये च वैयाकरणा नैयायिका वा, न ते गणितशास्त्रे प्रवेशं लभन्त इति। एवं सर्वास्वेव लोकोपयोगिविद्यासु संस्कृत-पाठशालासु अर्द्धचन्द्रं प्राप्तासु अवशिष्टा केवलं पारलौकिकी सिद्धिः। सापि न क्वापि दृग्गोचरीभवति। न हि आस्तिकाः, धर्मप्रवणाः, निस्पृहाः, एकान्तनिषेविणः, विषयान् विषमिव त्यजन्तोऽलोक्यन्ते संस्कृतज्ञाः पण्डिताश्छात्रा वा। तादृशविषयाणामपि अध्ययनाध्यापनेऽप्रवेशात्। 'स्वर्गकामो यजेते' ति वाक्योच्चारणेनैव मन्ये न स्वर्गप्राप्तिः सुलभा। "सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगमि" त्यभाणकं हि सर्वजनविदितम्। आस्तां कथा ऐहिलौकिकसुखसाधनस्य। स्वर्गादिसाधनेष्यस्माभिः किं क्रियते यत्नविशेषः? स्वर्गादिसाधनकथा दूरे तिष्ठतु, तज्ज्ञानायापि किं पाठ्यते इति। न परोक्षं पण्डितप्रकाण्डानाम्। कथयन्तु महाभागाः! अनया पठनपाठनप्रणाल्या कार्योपयोगिनी कीदृशी शक्तिरस्मास्वाविर्भवति? कीदृशं च ज्ञानं वयं समुपलभा-महे, युगान्यधीत्यापि संस्कृत-पाठशालासु आसु?

अत्रेदमाशङ्कंते केचिद् वैतण्डिकाः- न कोऽपि विषयः ऐहिलौकिकपारलौकि-कान्यतरसंबन्धं जह्यात्। तेनानिच्छतापि त्वया एकेन केनापि सहावश्यं संबन्धः स्थापनीयः संस्कृतशिक्षाया इति। तान् प्रति ब्रूमो वयम्—सत्यं, संबन्धः स्थापनीयः। वस्तुतस्तु नास्त्येव सः। भांति सिद्धा अपि पदार्थाः किं न सन्ति संसारे? सन्त्येव। किन्तु वस्तुतो न सन्ति सत्ता तेषाम्। तथैव लोकद्वयेन न वास्तविकः सम्बन्धो वर्तमानसंस्कृत-शिक्षायाः। काल्पनिकोऽस्तु। किं तेन साध्यतां नाम।

अद्यत्वे संस्कृत-पाठशालासु किं किं पाठ्यत इत्यपि न परोक्षं विदुषाम्। तथापि किंचिद् विविच्यते—व्याकरणं न्यायः साहित्यं चेति विषयत्रयी संस्कृत-पाठशालाप्राङ्गणे नृत्यन्ती दरीदृश्यते। तत्रापि न्यायः खलु क्षीणपुण्यो विरलविरलः शनैर्जीर्णतां नीयमानोवलोक्यते। अवशिष्टा केवलं विषयद्वयी। तत्र व्याकरणं मुखस्थानीयत्वान्मुख्यतां भजते तस्यैव दशा किंचिदवलोक्यतां नाम विचक्षणैः।

व्याकरणं हि शब्दशास्त्रम्। व्याकरणाध्ययने शब्दानां शुद्धोच्चारणं शुद्ध-लेखनञ्च प्रयोजनम्। किन्तु पठनपाठनप्रणालीदूषणेन द्वादशवर्षमविच्छिन्नमधीत्या-पि शुद्धभाषणे लेखने च न प्रभवन्ति वराकाश्छात्राः? किं बहुना शुद्धोच्चारणे च बहूनां विद्वत्तल्लजानामपि दृष्टा समुपेक्षा। स्थानप्रयत्नज्ञानेपि मन्ये न तत्र पक्षपातः।

केवलं फक्किकासु कृतपरिश्रमाः समवलोक्यन्ते सर्वत्रछात्राः। व्याकरणज्ञानस्य मुख्यं प्रयोजनं "रक्षोहागमलघ्वसन्देहास्तु" सुदूरदूरं गतम्। को हि व्याकरणमधीत्य वेदार्थज्ञाने नियुंक्ते? तिष्ठतु तावद् वेदार्थज्ञाम् भाषापाण्डित्यं तु सिद्ध्येत्। तदपि न हन्त! सिद्ध्यति। वस्तुतस्तु भाषापाटवं न व्याकरणाध्ययनस्य विषयः, अपि तु व्यवहारस्य। स्वीकृतं हि व्याकरणैकधनैर्महाभाष्ये कृतभूरिपरिश्रमैः पण्डितप्रवरैः श्रीनागोजिभट्टमहाभागैर्व्यवहारस्य शक्तिग्राहकशिरोमणित्वमिति।

बहवश्छात्रा अस्माभिस्तादृशा दृष्टाः, ये सिद्धान्तकौमुदीकण्ठाग्रीकृत्यापि शब्दानां क्रियाणां च न प्रवक्तुं पारयन्ति शुद्धानि रूपाणि। एष मन्ये पठनपाठनस्यैव दोषो न राज्याश्रयाभावस्य। ग्रन्थपरिमितानां प्रयोगाणामर्थज्ञाने तु नास्माकं प्रयासः। भावयति शब्दस्य कोऽर्थ इति पृष्टे 'भवन्तं प्रेरयति भावयतीति' सम्यग् विग्रहे कृतेऽपिशब्दस्य वास्तविकोऽर्थो बहुभिश्छात्रैर्न कर्त्तुं पार्यत इति बहुशो दृष्टचरम्। अस्तु, कौमुद्यन्तव्याकरणस्य कथा, उच्चकक्षास्वपि किं पठामः; केवलं सूत्राक्षरविषयको विवाद एव। एवमेव न्यायशास्त्रेऽपि अनुमानप्रपञ्चअवच्छेदकावच्छिन्नवागुरासु पतिता वयं न पदार्थपरिचये प्रभवामः। हेत्वाभासलक्षणे एव केवलममूल्यजीवनस्यास्य यापनं कुर्मः।

आसीत् तादृशोऽपि समयः, यस्मिन्नस्य महती आवश्यकतासीत्। तर्कप्रधानैश्चार्वाकैर्बौद्धैश्च व्याप्तेस्मिन् देशे आर्यसभ्यतायाः सनातनधर्मस्य च रक्षणार्थं स्वीकृतोऽयं पन्थास्तात्कालिकैरस्माकं पूर्वजैः। किन्तु प्राघुणिको गृहानधिकरोतीति कोयं जघन्यः प्रकारः? अद्यत्वे धर्मसंस्कृतिघातकाः ये ये प्रकारा अस्माकं पुरस्तिष्ठन्ति तेषां निराकरणं नाद्यतनेषु संस्कृतपाठशालासु पाठ्यमानेन न्यायशास्त्रविचारेण संभवतीति निःसाध्वसं शक्यते वक्तुम्। इयमेव परिस्थितिः काव्यसाहित्याध्ययनस्यापि। पर्यायरटनेनैव काव्याध्ययनं समाप्यते। काव्याध्ययनस्य मुख्यं प्रयोजनं भूगोलेतिहासपदार्थजातप्रक्रान्तपरिचयादिव्यवहारज्ञानं च दूरापास्तम्। किन्तु आचार्यपरीक्षोत्तरणं यावत् प्रपठ्यापि भाषाज्ञानातिरिक्ता न कापि कार्योपयोगिनी शक्तिर्विकासमापद्यमानावलोक्यते। महाभागाः! अत्युपयोगिनी शिक्षापद्धतिरियम्? किमनयैव पठनपाठनपद्धत्या स्वोन्नतिः समाजोन्नतिर्देशधर्मोन्नतिर्वा शक्यते संसाधयितुम्? किं बहुना व्युत्पन्ना अपि छात्राः केवलं वाक्शूरत्वमेव भजन्ते, नार्थप्रवणतायै यतन्ते। विचार्यताम्—अर्थविषयिणी कापि शक्तिः प्रज्ञारूढा न भवेत् तर्हि केवलं शब्दयोजनाशक्त्या किंवा वराकः स जगति साधयेत्। अस्माकं पूर्वजैः सुबहु परिश्रम्य यज्ज्ञानमर्जितम् तस्य रक्षणमपि नैवंविधेनाध्ययनेनाध्यापनेन वा संभवति। आस्ताम् तावत्. बह्वाम्रेडितोयं विषयो न विस्तारमपेक्षते।

भारतीयशास्त्राणामेष घण्टाघोषः—यज्जीवनस्य धर्मार्थकाममोक्षरूपचतुर्वर्गफलप्राप्तिरेव मुख्यं लक्ष्यम्। ययाशिक्षया तेष्वेकतमोऽपि न सिद्ध्यति साऽपि किं शिक्षा? कथमिति चेच्छ्रूयताम्, धर्मविषयविवेचकानां धर्मशास्त्राणां न क्वापि पठनपाठनं प्रचलति, येनमास्तु क्रियाप्रावीण्यम्, धर्मज्ञानं तु भवेत्? अस्माकं धर्मशास्त्र

एव राजनीतिर्व्यवहारशास्त्रं च समाविष्टम् । तयोः सर्वथाऽज्ञाने एव धारासभासु के के प्रस्तावा धर्मविरुद्धाः समागच्छन्ति, कैः प्रस्तावैः समाजशास्त्रस्य संबन्धः इत्यपि न ज्ञातुं शक्यते अस्माभिः इति कथं धर्मरक्षकत्वमस्माकं सुरक्षितं भवेत्? अर्थकामशास्त्रयोस्तु कथैव कर्णकुहरे न पतिता पाठशालास्वासु । अवशिष्टा केवलं मोक्षचर्चा । मान्याः ! मोक्षो हि नाम न तादृशं सुलभं वस्तु यदनायासेन केवलं वाक्प्रपञ्चेन प्राप्नुयान्नरः । अविदितसुखदुःखं निर्गुणं वस्तु किञ्चिन्मोक्षपदं लभते । द्वन्द्वातीताः कति छात्राः पण्डिता वावलोकिता भवद्भिर्महाभागैः ।

किंच—धर्मज्ञानाय "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः" इति वचनेन भगवतो वेदस्यैव प्राधान्यम् । वेदाध्ययनेनैव सोऽयं धर्मः परिज्ञातुं शक्यते । तस्य भगवतो वेदस्याध्ययनाध्यापनं न प्रायेण संस्कृतपाठशालासु प्रचलति । क्वचित् प्रचलितमपि केवलं वेदाक्षररटनमात्रेणैव परिसमाप्यते नार्थपरिज्ञाने प्रयत्नः प्रविलोक्यते । अनर्थाध्ययनस्य निन्दा स्वयं वेदेनैव विहिता—"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।" एवं यद् गृहीतमविज्ञातम्, उत त्वः पश्यन्, उत त्वं सख्ये इत्यादिबहुभिर्मन्त्रैस्तथा प्रतिपादितम् । भगवता जैमिनिना तु "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति सूत्रयता न केवलमर्थज्ञान एव विश्रान्तमपि तु क्रियाप्रवणतायां सार्थकत्वमुररीकृतं वेदस्य । भगवता मनुनाप्युक्तम्—

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादनम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥ इति ।

नीतिशास्त्रस्याप्ययमेवोपदेशः—

"शास्त्राण्यधीत्यापि भवन्ति मूर्खाः, यस्तु क्रियावान् पुरुषः स विद्वान् ।" इति किं विस्तारेण शब्द प्रधानशिक्षा नास्माकं पूर्वजैः कदाप्यादृतेति न विस्मरणीयम् । परमस्माकं दुरदृष्टत्वाद् बहोः कालाद् देशेऽस्मिन् शब्दप्रधानतैव शिक्षापद्धतौ सुदृढं स्थानं चकार । न जाने कीदृशः स आसीद् भारतसौभाग्यापकर्षको दुर्भाग्यसूचकः समयो यस्मिन् किल शब्दप्रवणतैव निदधाति स्म पदमस्माकं शिक्षापद्धतौ । परीक्षायुगे प्रचलिते तु सा दृढतरं पदं रोपितवतीति न परोक्षं विदुषाम् । विद्यार्थिनां केवलमेतावदेव लक्ष्यम्, येन केनापि प्रकारेण परीक्षाप्रवाहिणीं तरेम इति । फलमेतस्यैतत् संजातम्—यद् वयं शिक्षायाः सुदूरं पतिताः । निर्वेजकस्य सारमेयस्येव संस्कृताध्येतॄणां गतिः समजनि । न ते ज्ञानैकधनाः न च भाषाभूषणानि च संवृत्ताः । "संस्कृतं मृतभाषा" इति वैदेशिकानां कथनं कर्णकुहरेषु सत्यं शूलायते नाम परं किञ्चिद् विचार्यमाणे व्यावहारिकशब्ददारिद्र्यमस्माकं पुरोवतिष्ठत एव । यस्या भाषायाः कोषः पूर्णतां न भजते, परिपूर्णोऽपि वा कोषो नूतनशब्दप्रवेशैर्न वर्धयते तस्या व्यावहारिकत्वं कथं सिध्येत्! प्रतिसहस्रमेकोऽपि वा पुरुषो यया न व्यवहरति सा कथं परैर्मृतभाषेति न व्यपदिश्येत? तस्माद् व्यावहारिकतां प्राप्यैतां परिमार्जनीयः पण्डितानां शिरसि समागतः कलङ्कः । तदर्थं प्राथमिक्यां शिक्षायां भाषाज्ञानाय यतनीयम् । व्यावहारिकशब्द-

ज्ञानं समुपेक्ष्य व्याकरणनियमाँश्च तिरस्कृत्य यद्वातद्वा शब्दैर्वाक्यमापूर्य अस्यामेव शताब्द्यां संस्कृतं राष्ट्रभाषा भवेदिति समुद्घोषणं तु मन्ये परिहासास्पदमेव भवेत्। तस्मात् प्राचीनकाव्यकोषादिसाहाय्येन व्यावहारिकः शब्दकोषः परिबृंहणीयः। माध्यमिक्यां च शिक्षायां समयोपयोगिनो विषयाः प्रवेष्टव्याः। यो हि संस्कृतभाषामार्यसंस्कृतिं च रक्षितुं वाञ्छति, तेन अनिच्छतापि अवश्यमेतत् संशोधनं स्वीकार्यम्। अस्माकं शिक्षाया इतिहासोपि समये समये शिक्षायाः परिवर्तनमङ्गीकरोति इति किं न विदितम्?

आसीत् कश्चित् सुसमयः, यस्मिन् वेदप्रधानैव शिक्षा भारतीयासु सर्वास्वेव पाठशालासु प्राचाल्यत। किन्तु दोषयुक्तायां च तस्यां जातायां बौद्धजैनादिमतानामाविर्भावः समजनि। तदा वादात्मिका दर्शनशिक्षाप्रणाली प्रचलिता। भारतयवनप्रवेशप्रकाले च कृतकृत्यंमन्याः लोकनायकाः दुर्वहगर्वतया स्तुतिकथाश्रवणोत्सुकाः, विलासितया च नायिकादिवर्णनेषु दत्तचित्ता आसन् यदा, तदा स्तुतिप्रधानानि नायिकानखशिखा वर्णनपराणि च काव्यानि जाँनि लेभिरे तान्येव च पठनपाठनस्य विषयः। तदानींतने च काले वैदिका उपहसनीयतां गताः। दार्शनिकानां दर्शनमपि नाभवज्जनानां रुचिकरम्। किन्तु कालक्रमेण तादृशोपि समागतः समयः यत्र "रण्डागीतानि काव्यानि" इति ध्वनिः श्रवणविवरातिथिः समजनि। काव्येन हन्यते शास्त्रं तच्च गीतेन हन्यत इत्यपि प्रसृतः पण्डितप्राङ्गणेषु कोलाहलः। वादैकप्रवणाः पण्डिता एव वास्तविका विद्वांसः परिगण्यन्ते स्म। किन्तु अद्यत्वे न सोपि समयः। अद्यत्वे तु परिपाटीयं प्रचलिता यद् येन केन प्रकारेण परीक्षां समुत्तरामः। पठनस्य परीक्षोत्तरणमन्तरा न किमप्युद्देश्यम्। यावदध्ययनं क्षेत्रादिषु भोजनं लभेमहीति विचारयन्तः भविष्यज्जीवने दृक्पातमकुर्वन्तः संस्कृतपाठशालासु प्रविशन्ति बहवश्छात्राः, यथाकथंचित् परीक्षासु समुत्तरन्ति च समुत्तीर्य च परीक्षाः, मार्गभ्रष्टा इव इतस्ततो विचरन्तः सेवावृत्त्यै जनानामुपहासास्पदतां व्रजन्ति। किं तैरधीतमद्यावधीति पृष्टाः मौनमेवावलम्बंते। लौकिकोपयोगिविषयाध्ययनाभावे न तेषां शिक्षितपदभाक्त्वं वराकाणाम्। लोकोपयोगिनो विषयाश्च-गणितं भूगोलविद्या, इतिहासः, विज्ञानम्, अर्थशास्त्रम्, भाषाशास्त्रम्, गणितशास्त्रं चेति प्रथिता लोके। तेषु चञ्चुप्रवेशोपि नैषां महानुभावानाम्। कतिभ्यश्चिद् वत्सरेभ्यः पूर्वं वाराणसेय-गवर्नमेण्टपरीक्षायाः प्रथमविभागे महाकवेः कालिदासस्य मेघदूतं खण्डकाव्यं नियतमासीत्। मेघदूतस्य प्रश्नपत्रे ग्रन्थनाम न विलिख्य "भूगोले प्रश्नाः" इति लिखितमासीत्। कदाचित् परीक्षा-विभागस्य परीक्षकस्य वा ध्यानमत्राकर्षितम्। किन्तु भूगोलविषये अपरिचिताश्छात्राः केवलं समासपर्यायादिभिरेव व्याख्यां कुर्वन्तोस्माभिर्दृष्टाः। तस्यायमेव हेतुः यन्न ते तादृशं पठिताः। अन्यथा तथैव ते उदतरिष्यन्। मन्ये संस्कृतमधीयानाश्छात्रा भवन्ति प्रायशो दरिद्राः किन्तु न ते बुद्धिदरिद्रा अपि भवन्ति। यदि ते पद्धतिं तादृशीं व्यज्ञास्यन् तदा तथैव कार्यमकरिष्यन्।

अपि च लोकवृत्तज्ञानाय दैनिकसमाचारपत्रपाठनादिप्रवृत्तिरपि

छात्रेष्ववश्यमाधेया । एतदर्थं संस्कृतभाषायामपि वृत्तपत्रं निःसारणीयम् यस्मिन् समये, यस्यां जातौ, यस्मिन् देशे वयमुत्पन्नाः यत्र वा वयं तिष्ठामस्तस्य देशस्य तस्य कालस्यज्जातेर्वा ज्ञानं विहाय केवलं परःसहस्रवत्सरेभ्यः पूर्वमेव वयं विचराम इति सत्यमुपहासास्पदम् ।

संस्कृतपाठशालासु शिक्षणीयतया गृह्यमाणेष्वपि विषयेषु कस्यचिदेकस्यैव विषयस्याध्ययनं सर्वाङ्गीणशिक्षाप्राप्तौ न्यूनतापादकमिति अपरो दोषः । प्रारम्भावधि आचार्यपर्यन्तमेकमेव विषयमधीत्य स्वात्मानं पण्डितं मन्यमानाः संस्कृतज्ञाः विषयान्तरे अपरिचिता एव सर्वथा भवन्ति । व्युत्पत्तिर्हि नाम नैकविषयज्ञानाधीना । प्राचीनानां सर्वतोमुखं पाण्डित्यमत्र निदर्शनम् । तस्माद् विषयान्तरेष्वपि चञ्चुप्रवेशोवश्यं कर्त्तव्यः ।

किञ्च—प्रारम्भिकशिक्षायां नाम्ना लघवोपि ज्ञाने कठिना ग्रन्था नियता वर्तन्ते, सोपि मन्ये पठनपाठनपद्धतौ दोष एव । शिक्षाविज्ञानगवेषकैः सुबहु निर्णीय सिद्धान्तितं यत् प्रारंभिकी शिक्षा यावदेव सरलत्वं रुचिकरत्वं च प्राप्नुयात् तावदेव शिक्षाप्रचारे सौकर्यं भवेत् । अत एव स्वभाषाप्रचारमभिलाषकाः शिक्षाधिनायकाः प्रतिदिनं प्रारंभिकशिक्षायां सरलतामाधातुं प्रयतन्ते । तेनैव तेषां भाषाणामधिकाधिकः प्रचारोवलोक्यते । अस्माकं तु प्रारंभिका शिक्षाद्यापि काठिन्यं भजत एव । अक्षरपरिचयं कृत्वा संस्कृतपाठशालायां प्रविविक्षूणां छात्राणां संमुखं विद्वन्निकषायमाणं सूत्रनिबद्धं पाणिनीयं व्याकरणमस्माभिरुपस्थाप्यते । कोपश्च घोषणार्थम् । तच्चेदं दृढ़सर्गलाद्वयं प्रवेशमेव तेषां कोमलमतीनां वारयति सुन्दरेस्मिन् संस्कृतमन्दिरे । अपरिचितसंस्कृतभाषाणां वराकाणां छात्राणां शेमुषी कथं नाम प्रवेशमासादयेत् कठिने व्याकरणे । ततः किल वराकास्ते बालकाः अध्यापकैस्ताड्यमानाः केवलं ग्रन्थाक्षराणि वा गुरुमुखान्निःसृतानि वाक्षराणि कण्ठे कुर्वन्ति । फलमस्यैतद् भवति यद् शतशश्छात्रा प्रथमशिक्षायामेव नैराश्यं भजमाना कार्यान्तरे नियुक्ता भवन्तीति नैकशो दृष्टचरम् । कथमित्थं संस्कृतभाषायाः प्रचारः सेत्स्यति । कथं वा कोणे विलीना, पीना भवन्तीयं जीवनं स्वकीयं रक्षिष्यति ! प्राक्तने च संस्कृतशिक्षाप्रचारकाले संस्कृतशिक्षायाः सरलत्वाय यतन्ते स्म विद्वांसः इति तेषां ग्रन्थावलोकनेन स्पष्टं प्रतीयते । विषयावबोध एव तेषां मुख्यं लक्ष्यम् । सरलसरलैः शब्दैः गंभीरगंभीरा विषया यथावगता भवेयुरिति ते प्रयतन्ते स्म । तस्यैतस्य एतत् फलं भवति स्म यद् भाषावबोधाय न कालयापनं सोढव्यमभूत् । अद्यत्वे तु भाषाकाठिन्यमपि पाण्डित्ये परिगण्यते । हन्त ! तद् विहाय सरलसरलैर्वाक्यैः भाषापरिचयः तदनु च तदीयव्याकरणज्ञानमित्ययं युक्तियुक्तः पन्थाः परिगृहीतव्यः संस्कृतप्रचाराय ।

अपरोपि एको महान् दोषोस्माकं पाठनपद्धतौ संप्रविष्टः । स चायं वर्तते । यत् न कापि पाठशाला या न भवेदाचार्यान्ता, न कोपि पण्डितो यो न सर्वं पाठयेत् । विरलाः खलु पण्डिताः विरलाश्च पाठशाला रोगेणानेन मुक्ताः ।

'नहि सर्वः सर्वं जानातीति' न तेषां पुस्तकपत्रादिषु क्वचिदपि समागतम्। केवलेनैकेन पण्डितेन साहित्यं व्याकरणं न्यायः आयुर्वेदश्चेति विषयचतुष्टयी शास्त्र्याचार्यान्तपरीक्षापर्यन्तं पाठ्यमानास्माभिर्दृष्टा । तस्याध्यापकस्य कृते सर्वमेतद् गौरवायेति मन्यामहे । किन्तु-उच्चकक्षास्थच्छात्रानध्यापयत एव तस्य सम्पूर्णःसमयो व्ययेति । वराकाः प्रथमशिक्षाच्छात्रास्तु मध्यमादिश्रेणिस्थ-विद्यार्थिभिरेव पाठ्यन्ते । कथं ते प्रथमकक्षाच्छात्राणां मानसभावविकासाय प्रभवेयुः । केवलं कण्ठस्थीकरणार्थं काचित् पङ्क्तिस्तदग्रे वाचयन्ति । तेपि चानन्यगतिकाः घोषणामात्रशरणाः केवलं कीरत्वमेवावलम्बन्ते । तेनैव च घोषणाबलेन ते परीक्षा अप्युत्तरन्ति ! शास्त्राचार्यादिपदवीरप्यधिगच्छन्ति । अध्यापकाश्चाग्रे भवन्ति । किन्तु घोषणाप्रधानैस्तैः संस्कृतस्य क उपकारः क्रियेत नाम ? तस्मादारम्भादेव शिक्षार्थिनां यथा मतिविकासमासादयेत्तथा सपरिश्रमं यतनीयम् । तदर्थं च पाठशालासु पठनपाठनस्यैयत्तापि स्थिरीकरणीया । नियमाश्च संरक्षणीयाः पालनीयाश्च ।

उद्देश्यं च संस्कृत-शिक्षायाः सुविचार्य स्थिरीकरणीयम् । मदीयविचारे भारतीयधर्मस्य भारतीयसंस्कृतेश्च रक्षणमेव संस्कृतशिक्षाया उद्देश्यमिदानीं भवितुमर्हति । अनयोः संस्कृतभाषाध्ययनमात्रसाध्यत्वात् । भारतीयधर्मज्ञानं च वेदस्मृतिसदाचारज्ञानसाध्यम् । "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रिय-मात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम् ।" इति स्मृतत्वात् । तस्मात् सार्थवेदाध्ययनम्, स्मृत्यादिधर्मशास्त्राध्ययनम्, पुराणेतिहासाध्ययनम्, सदाचार-शिक्षा च संस्कृतपाठशालानां भवेत् प्राधान्येनाध्ययनस्य विषयः । आवश्यक-कर्मकाण्डोपि नाम पण्डितैर्ज्ञातव्यो ज्ञापयितव्यश्च । व्याकरणादिशास्त्रे कृतपरि-श्रमाः व्युत्पन्नाः पण्डिताश्च कथावाचने पाटवं संस्कारादिक्रियाकारणे कौशलं धर्मोपदेशे चातुरीं च नात्मसात्कुर्वन्तीति साधारणानामसंस्कृतज्ञानां तत्तद्विषये दृश्यते प्रवेशः, येन हि जनतायाः प्रतिदिनं जायमानाऽश्रद्धा, संस्कृतपण्डितानां जीविकाप्रश्नश्चेत्युभयमस्माकं संमुखे तिष्ठति । यदि तेस्मिन् विषयेपि दत्ता-वधानाः भवेयुस्तर्हि-"आम्राश्च सिक्ताः पितरश्च प्रीणिताः 'एका क्रिया द्व्यर्थकरी प्रसिद्धा" इत्याभाणकमपि चरितार्थं भवेत् । संस्कृतभाषायाः प्रचारः आर्यसंस्कृतेः रक्षणञ्च संभवेदिति शम् ।

॥ संस्कृतपाठशालासु पठनपाठनपद्धतिः ॥

श्रीसभापतिशर्मा उपाध्यायः, बिरलामहाविद्यलयाध्यक्षः, काशी

श्रीः

श्रीप्राच्यविद्यापरिषत्सुवल्ली समुन्नयाद्रिं परिचुम्बयन्ती ।
सम्पादयन्ती विदुषामभीष्टं नृपप्रजासौहृदमातनोतु ॥

न तिरोहितमेतत्प्रेक्षावतां धीधनानां यत्साम्प्रतं निखिलभाषामातृभूतायाश्चतुर्वर्गफलप्रसविन्यास्त्रिदशीयभाषायास्तद्भाषोपजीविनां लोकसंस्थितिकारणीभूतविद्याचतुष्टयभारतीयनिधिरक्षकाणामद्यत्वे ऽकिञ्चित्करत्वेनोद्घोष्यमाणानां गीर्वाणवाणीसद्विदुषां च कीदृशी दयनीयाऽवस्थेति । तत्र कारणगवेषणायां प्रवृत्तायां प्राधान्येन राजकीयसम्बन्धाभाव एव तदुन्नतौ प्रतिबन्धकः, तत एव शिक्षणपद्धतेस्समीचीनप्रकाराभावोऽपि तथा । यद्यपि तत्र तत्र संस्कृतविद्याप्रचाराय भूयांसो विद्यालयाः स्थापिता दृश्यन्ते, तथापि न तेषु शिक्षणमार्गप्रदर्शकानां दृष्टिलेशोऽपि दृश्यते । यत्र कुत्रचित्कथञ्चित् तेषां दृष्टिपातो जायते तत्र तादृशदृष्टिनिक्षेपेणानेकविधकुप्रबन्धतो हानिरेव संपद्यते । प्रथमं तावत्संस्कृतभाषाशिक्षणाय स्थापितेषु विद्यालयेषु नहि काचन नियमिता पाठनपद्धतिर्दृश्यते । केवलं राजकीयशिक्षासमित्या नियमितपरीक्ष्यग्रन्थानां यथाकथञ्चिदध्ययनाध्यापनमात्रेण छात्राणामुत्तीर्णतया नहि तद्गौरवं कथमपि स्यात् । अतः संस्कृतविद्यालयस्थापनाय तत्रोपयोग्यध्ययनाध्यापनाय च कश्चन नियमो विधेयः । यथाऽऽङ्गलविभागे हिन्दीशिक्षाविभागे च तत्तद्वर्गपर्यन्तं शिक्षाप्रदानाय एतादृशं स्थानम्, एतावन्तोऽध्यापकास्तत्तद्विषयाध्यापनाय लेखनानुवादादिकार्यसौकर्याय च नियुक्ता उपलभ्यन्ते, एवमेव गृहाद्यसंकीर्णेषु विस्तृतेषु स्वास्थ्यवर्द्धकेषु विद्याभ्यासप्रतिबन्धकदोषास्पृष्टेषु स्थलेषु पाठशालाः स्थापनीयाः तत्तद्वर्गशिक्षोपयुक्ताः तत्तद्विषयानुसारेण अध्यापकाश्च ।

संप्रति संस्कृतविद्यालयसंस्थापकानामिच्छैव तत्र संस्कृतविद्योपहासकरनियमप्रवर्तिका । अत एव वराकाणां छात्राणां सर्वविधेषु विषयेषु पाटवाभावः प्रतीयते । अतो ये विद्यालयाः प्राचीना यथाकथञ्चित्प्रचलिता अवलोक्यन्ते तेषु यथासम्भवं परिष्कारो विधेयः । परिष्कारासम्भवे तु उपेक्षणीयाः । परन्तु अतः परं ये नवीनाः स्थापिताः स्युस्तदर्थं सर्वथा प्रतीयमानानां त्रुटीनां परिमार्जनाय संस्कृतविद्यागौरवसंरक्षणाय च यतनीयमेव । यास्त्रुटयस्संस्कृतान्तेवासिषु प्रतीयन्ते तत्र शिक्षाप्रवर्तकानामेवापराधः । संस्कृतसाहित्ये व्यवहारोपयोगिनीतिशास्त्रस्य, कर्तव्याकर्तव्यज्ञानप्रदधर्मशास्त्रस्य, प्राड्विवाकत्वसंपादकशास्त्रस्य च साम्प्रतमुपलभ्यमानस्यापि न कुत्रचित्काचन शिक्षा विद्यते ।

प्रथमां परीक्षामारभ्य मध्यमां यावत् त एव विषयाः स्थापनीया ये व्यवहारोपयोगिनः सन्तः संस्कृतभाषाभाषणे पाटवसम्पादका भवेयुः । तत्र राजकीयभाषा स्वस्वप्रान्तीयभाषा हिन्दीभाषा च गौणतया शिक्षणीया । यतस्तत एवा-

ध्ययनाद्विरतानां संस्कृतज्ञानां क्वचिद्विभागे जीविकोपलब्धिः स्यात्। एवं सति राजकीयप्रबन्धसमितिष्वपि (डिस्ट्रिक्टबोर्ड, म्युनिसिपैल्टीत्यादिषु) संस्कृतज्ञानां प्रवेशः सम्भाव्येत। मध्यमापरीक्षातः परं ते ते प्रधानविषया नियन्त्रणीयाः यतस्तेषु प्रौढ़पाण्डित्यं सम्पादितं भवेत्। राजकीयसहायताविभागतो यावद् द्रव्यं समुपलभ्यते तत्रापि-अस्मिन्विषये एतावान्व्यय-इत्येवंरूपेण यत्तच्छास्त्रमाश्रित्य व्ययस्य विभागो विधेयो येन सर्वशास्त्राणामध्ययनाध्यापनप्रवृत्तौ छात्राणां प्रवेशः सम्पद्येत। प्रतिप्रान्तं तत्तत्परीक्षासु प्रथमश्रेण्यामुत्तीर्णेभ्यश्छात्रेभ्य आङ्गलादिविभागवत् क्रमशः प्रशस्ताः वृत्तयः प्रदेयाः। यतः संस्कृतान्तेवासिनामुत्साहोपवर्द्धनं सम्भवेत्।

अदृष्टसम्पादनायैव संस्कृतविद्यालयाः स्थाप्यन्ते न तु दैशिकापेक्षितयोग्यव्यक्त्युत्पादनायेति तत्संस्थापकानां मनोवृत्तिर्निराकृता यथा स्यात् अदृष्टसिद्धिरैहिकसिद्धिश्च इत्युभयमपि कार्यमनेन सम्पद्यत इतिमनोवृत्तिश्चोत्पद्येतेत्येवं प्रबन्धो विधेयः। एतदर्थं संस्कृतविद्यापारंगतानां भाषान्तरमपि जानतां व्यावहारिकप्रबन्धेऽपि लब्धपाटवानां योग्यतमविदुषामेका समितिः स्थापनीया। यतः प्रदर्शितक्रमेणैव विद्यालयानां प्रबन्धो भवेन्नतु संस्थापकव्यक्त्यनुरोधमात्रेण। अन्नसत्ररूपेण रूपान्तरेण च या या वृत्तयस्तत्र तत्र महनीययशःशालिभिः प्राक्तनराजवर्गैः धनिकश्रेष्ठ्यादिवर्गैश्च प्रचालिता विद्यन्ते तासां संस्कृतान्तेवासिनां कृते शोभनोपयोगो यथा भवेत् तथा प्रबन्धनीयम्। तया समित्यैव स्वस्वपर्यालोचितकार्यस्य सौकर्य्यसम्पादनाय धनं संगृह्य कश्चन स्थायीकोषः स्थापनीयः। तत्समित्या सह तत्र तत्राध्यापयतां विदुषामपि निर्धारितनियमेन सम्बन्धोऽवश्यं स्थापनीयः। प्राक्तनपुराणेतिहासादीनामाधुनिकभूगोलेतिहासादीनाञ्च सामान्यरूपेण ज्ञानायापि कश्चन प्रबन्धोऽपेक्ष्यते। अल्पायेन कालं यापयतां संस्कृताध्यापकानां छात्राणां च कृते स्वास्थ्यादिसंरक्षणाय आयुर्वेदाचार्याश्चिकित्सका डाक्टरपदप्रसिद्धाश्च यथाकथञ्चिन्नियोजनीयाः। वैदेशिकमार्गेण प्राप्तावसरेभ्यो दुर्व्यसनेभ्योऽपि छात्राः संरक्षणीयाः।

प्रतिमासं तत्तद्विषयमवलम्ब्य सभासु सम्भाषणायापि छात्राः शिक्षणीयाः। वेदपुराणेतिहासादिषु परस्परविरुद्धत्वेनावभासमानानां विषयाणां विरोधपरिहारशैलीष्वपि वैदुष्यसम्पादनाय शिक्षाविभागः स्थापनीयः।

आधुनिकविज्ञानवैभवेनोपलभ्यमानानां नानाविषयाणां संस्कृतसाहित्ये सन्निवेशो यथा स्यात्तथा संस्कृतभाषयाऽनूद्य निबन्धा निर्मापणीयाः। एवं राजकीयन्यायविभागे भिन्नभिन्नरूपेणोपस्थितानां शासनोपयोगिनां वार्तादण्डनीत्यादीनामपि संस्कृतभाषासु संनिवेशाय पारितोषिकादिदानेन आङ्गलादिभाषाभिज्ञाः संस्कृतविद्वांसः प्रवर्तनीयाः। अधुना संस्कृतभाषा कियताप्यंशेन भाषान्तरमतिक्रान्तापि भाषान्तरीयां साधारणविषयविहीना सुरभारती यथा न भवेत्तथा यतनीयम्। उच्चकक्षासु संस्कृतभाषयैवाध्यापनादि कार्यं विधेयम्। येन प्रवाहरूपेण संस्कृतभाषया भाषणे भूयसां विदुषां क्वापि न्यूनता न सम्भवेत्।

एवं कृते कियत्कालानन्तरं प्रगाढ़पाण्डित्यवन्तो विद्वांसः स्वस्वजीविका-निर्वाहाय तत्तद्विभागेषु प्रवेशनार्हा स्वल्पसंस्कृतविद्याशालिनश्चोत्पत्स्यन्ते । साम्प्रतमुपलभ्यमाना दोषाश्च निवर्त्स्यन्ते । इति दिक्

प्राच्यविद्यापरिषदः सभ्यानां शक्तिरीदृशी ।
जायतां सुरविद्या स्याद्यया सर्वातिशायिनी ॥
काशीस्थविरलाराजमहाविद्यालयाधिपः ।
इतीशं याचते नम्र उपाध्यायः सभापतिः ।

वर्तमानकाले संस्कृतभाषायाः शिक्षापद्धतिः

कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री, जयपुरम्

भगवद्भावभूयिष्ठा भूरिभाग्यविभासिता ।
भ्राजद्भिसवभोगाढ्या भारते भातु भारती ॥ १ ॥

सभाजनीयाः सभापतिमहाभागाः! माननीया महद्वर्गाः! पूजनीयाः पण्डित-पुङ्गवाश्च!!

सोयं संस्कृतशिक्षाविषयः संस्कृतविद्याया लीलाभूमौ वाराणस्यामस्यां विचार्यत इति परमः प्रमोदविषयः। वाराणसी हि न केवलं संस्कृतविद्याया एव केन्द्रम्, अपि तु मालवीयमहोदयानां महोद्यमसाक्षिणा हिन्दूविश्वविद्यालयेन साम-यिकविज्ञानस्यापि सम्प्राप्तिभूमिः सेयं संजातास्ति। यथा हि मम 'घनाक्षरी' पद्यम्—

प्रारब्धो विकासः प्राच्यविद्यारुचेः प्राचीमुखे
साचीकृतामेतां तमोलहरीं निरीक्षध्वम्
प्रोल्लसन्ति सर्वजगज्जीवनाय चास्मिन्कला
विमलाममुष्य विभां परितः परीक्षध्वम् ।
प्रारब्धा सुधौघपारणैषा विबुधानां मुखे
संमुखे महोत्सवं सुमनसामुदीक्षध्वम्
भारतीयसारस्वतसिन्धूत्थितं मञ्जुमिष-
* मिन्दूपमं हिन्दूविश्वविद्यालयमीक्षध्वम् ॥

वर्तमानां संस्कृतशिक्षापद्धतिं ये किल मर्मदृशा समालोचितवन्तस्तेषां कथनमस्ति यत्सेयं शिक्षाप्रणाली वर्तमानकाले लोकानामुपयोगादत्यन्तं दूरत-रास्ति। शिक्षा हि मानवस्याऽस्य हृदयं परिष्कृत्य लोकव्यवहारोपयोगिनीं परलोकसाधिकां च शक्तिं तस्मिन्संपादयतीति सर्वसंमतः सिद्धान्तः। वर्तमान-काले परीक्षाक्रमनिबद्धा सेयं संस्कृतशिक्षाप्रणाली निजस्योद्देश्यपूर्तौ कियत्सफला भवतीति सांप्रतं विचारणीयं स्यात् ।

लोकालये निवसतोऽस्य मनुष्यस्य लोकव्यवहारनिर्वाहो यद्यप्यावश्यक एव किन्तु भारतवर्षस्यास्य चरमं प्रतिष्ठास्थानमस्ति आध्यात्मिकं तत्त्वम् । भौतिकविज्ञानमये नानाविधैराविष्कारैश्चरमामुन्नतिमधिरूढे चास्मिन् युगे भारत-वर्षस्य यत्किञ्चिद् गौरवमस्ति तत्किलाऽस्माकं महर्षीणां दिव्यं ज्ञानमादायैव। राजभाषाधिगमेन नवीनेस्मिन् भौतिकविज्ञाने भारतीयाः कामं कियतीमप्युन्नतिं संपादयेयुः किन्तु पाश्चात्यदेशानां समक्षे न तेषामग्रगामित्वं संभवति। स्पर्द्धापरि-धावनस्य ('रेस') दीर्घतमेऽस्मिन् क्षेत्रे पाश्चात्यदेशा नितान्तमग्रगामिनः संवृत्ताः। न तैः साकं भारतवर्षस्य स्पर्द्धाक्रमः संभवति। भौतिकविज्ञानगर्वितानां पाश्चात्यानां संमुखे यदि भारतवर्षस्य मस्तकमुन्नतमस्ति, तर्ह्यपि विज्ञानमवल-

* इन्दुसदृशो विश्वविद्यालयः, अतएव—इन्दुपक्षे रुचिः कान्तिः. पक्षान्तरे अभिरुचिः एवं कलाः, षोडशभागाः, चतुःषष्टिकलाश्च। विबुधा देवाः पण्डिताश्च, एवं सुमनसो देवाः सुधियश्च ।

मस्त्येव । अस्माकं प्रतिष्ठासीद् दर्शनग्रन्थैः । ये वैदेशिका विद्वांसोऽस्माकं दर्शन-ग्रन्थानां यत्किञ्चन तत्त्वमधिजग्मुस्ते उन्मुक्तहृदयेन प्रशंसन्ति यत्--'यस्मिन्देशे उपनिषत्सदृशानि ग्रन्थरत्नानि प्रसूयन्ते, अवश्यं स देशो ज्ञानज्योतिषामाकरभूतः' ।

दर्शनग्रन्थेषु योग्यतां संपादयितुम्, भाषाया उपर्यधिकारमधिगन्तुं च प्रथमतो व्याकरणस्य न्यायस्य चाध्ययनं प्रचलितं प्राचीनकालात्। 'मुखं व्याकरणं स्मृतम्' इति हि महिमा हिमालयपर्यन्तं विश्रुतः । अत एव हि संस्कृतशिक्षा-शरीरे मेरुदण्डभूतस्यास्यैव शास्त्रस्य पाठ्यक्रममालोचयन्तु दृष्टान्तरूपेण तत्रभवन्तः ।

'प्रथमा'परीक्षां प्रवेशिकां प्राज्ञपरीक्षां चोत्तीर्य यदा ह्यस्मिन् शास्त्रे प्रविशति तदा मध्यमामारभ्य आचार्यपरीक्षापर्यन्तम्--कौमुदी--मनोरमा--शब्दरत्न-परिभाषेन्दुशेखर--शब्देन्दुशेखर--वैयाकरणभूषण--मञ्जूषा--शब्दकौस्तुभ--महाभाष्य-वाक्यपदीयान्ता ग्रन्था अध्येतव्या भवन्ति । सूक्ष्मदृशा साम्प्रतमेषां विषयविचारः क्रियताम्--व्याकरणसूत्रकारस्तत्रभवान्पाणिनिरेतेषां सर्वेषां मूलम् । श्रीमान्पाणि-निर्वैदिकलौकिकशब्दानां साधुत्वमनुशशास--इमे शब्दाः साधवः, अत एव भाषायां व्यवहर्तव्याः, एतद्विपरीतास्तु त्याज्याः ।

एतस्मिन्विषये लब्धा सफलता श्रीमता पाणिनिना । गीर्वाणभाषायां बहुभिर्विद्वद्भिर्व्याकरणानि निर्मितान्यासन्, किन्तु पाणिनेर्व्याकरणमेव बहु-संमतिनियमेन लेभे प्राधान्यम् । कौमुदीमारभ्य भाष्यपर्यन्तेषु सर्वेष्वपि व्याकरणपाठ्यग्रन्थेषु--'पाणिनेर्यत्सूत्रं तस्यैकैकं पदं सार्थकम्, न किञ्चिद् व्यर्थम् । नच सूत्रगतपदसंनिवेशः कथमप्यन्यथा कर्तुं शक्यः' । एतावन्तं पाणिनेर्ग्रन्थसम-र्थनरूपमर्थमादाय युक्तिप्रयुक्तिभिः 'वादयुगस्य' तादृशी सृष्टिर्जाता या हि संस्कृतपण्डितसमाजं सती योषिदिव नाद्यापि परिहरति । न चास्याः प्रतीकारः कर्तुं शक्यते । वर्तमाने परीक्षाक्रमे सर्वेष्वेव शास्त्रेषु ये ग्रन्था अस्माभिरधीयन्ते ते हि प्रायः शास्त्रार्थयुगे निर्मिताः । तेषु शब्दप्रवणतैव आमूलचूडं विलोक्यते । एकैकं वाक्यम्, पदम्, पदैकदेशम्, किं बहुना एकैकां मात्रामादायापि कतिपय-पत्रव्यापकः शास्त्रार्थो ग्रन्थेष्वेषु प्रचलति । आश्चर्यम्, अर्द्धमात्रालाघवेनापि वयं पुत्रोत्सवं मन्यामहे, परम् इतः सर्वमप्यायुः केवलं शब्दाडम्बरेणैवास्माकं व्यत्येति, इत्यस्योपरि नास्माकं दृष्टिः ।

ग्रन्थस्य तत्त्वबोधाय किल टीका निर्मीयन्ते स्म । 'टीकते सह गच्छन्ति' इति टीका, इति व्युत्पत्त्या ग्रन्थस्य प्रत्येकाक्षरस्वारस्यबोधाय महद् गौरवं टीकायाः । किन्तु शास्त्रार्थयुगे याष्टीका निरमीयन्त तासां सृष्टिः खण्डन-मण्डनार्थमेवाऽभूत् । मूलकारो यदुक्त--नीचैष्टीकायां तद्विपरीतमेवावलोक्यते । 'ग्रन्थाक्षराणां किं तात्पर्यम्' इति मनसि संदेहोदये सति टीका साहाय्यमाच-रति, किन्तु व्याकरणादिग्रन्थानां याष्टीकाः शास्त्रार्थयुगे निर्मितास्तासु खण्डन-मण्डनान्येव बहुशः समुपादीयन्ते स्म । युगेऽस्मिन्प्रत्यक्ष परीक्ष्यताम्--शास्त्रार्थ--

प्रचुराः सिद्धान्तकौमुद्या न काश्चिट्टीकास्तत्त्वजिज्ञासूनामुपकुर्वते। ग्रन्थयोजनतत्परा बालमनोरमैव सर्वत्र सर्वदेशेषु च व्याप्ता।

एकमात्रस्य व्याकरणशास्त्रस्य दृष्टान्तमादाय एकदेशीयशास्त्रशिक्षायास्तदिदं फलं निदर्शितम्। किन्तु वर्तमानकाले 'परीक्षा'प्रकारस्य तथा सृष्टिर्जातास्ति येन वास्तविकपाण्डित्यं संशयापन्नमेव समभवत्। 'भारतवर्षे शिक्षायाः क्षेत्रं पुरा एतावद्विस्तृतं नासीदिति' नवीनालोचका वदन्ति, किन्तु एतेन सहैतदप्यवश्यमासीद् यत्सा पुरातनी शिक्षा सेवार्थुस्यर्थं द्वारं द्वारमर्हिएडमाना घोरस्वरमपमानमपि कदाचिदेवासहिष्ट। प्राक्तनशिक्षायाः कृते यद्यपि भूयान् समयोऽपेक्षितोऽभूत्, कष्टान्यप्यनेकानि सोढव्यान्यभूवन् परं सा शिक्षा स्थायिप्रभावा बहुमूल्या चासीत्। एषु दिनेषु कालेजस्था विद्यार्थिनो हसन्तः क्रीडन्तश्च स्वल्प एव वयसि आचार्याः, एम.ए.पदकाङ्क्षिताश्च भवन्ति। किन्तु पूर्वमाचार्यतासंपत्त्यर्थं भूयसः समयस्य अनल्पस्य चानुभवस्यावश्यकताऽभवत्। एतदर्थं ते गुरुकुले तीव्रां तपस्याम्, कठिनां च गुरुशुश्रूषामकुर्वन्। गुरुकुले तदेतत्क्लेशसहनं नासीत्काचिन्निन्दनीया वार्ता, प्रत्युताऽस्मिन् भूयानभिमानो महद् गौरवं चागण्यत। अनर्घराघवस्य कर्ता मुरारिकविर्गर्वादाह—'गुरुकुलक्लिष्टो मुरारिः कविः'।

किन्तु समयस्य परिवृत्त्या गुरूणां गृहात्, आश्रमेभ्यश्च शिक्षा निर्वासिता ऽभवत्। वर्तमानेन प्रवाहेण तेषां स्थाने 'स्कूलानां कालेजानां' च सृष्टिरक्रियत। तेषु प्रतिवर्षं सहस्रसहस्रसंख्यासु शिक्षिताः समवेता अभवन् एतावद्विस्तृतायाः संख्यायाः पूर्ववत्परीक्षणं नासीत्सहजं कार्यम्। अत एव कालेजपदवाच्येभ्यः शिक्षितानां परीक्षणाय नानाविधपरीक्षाणां सृष्टिरभवत्। परीक्षायुगस्यारम्भे परीक्षानियमानां नासीज्जटिलता। किन्तु पाठ्यग्रन्थेष्ववश्यं कठिनतासीत्। किन्तु शनैः शनैः परीक्षाधिकारिणः पाठ्यग्रन्थेष्वपि सारल्यं कृतवन्तः। ततः परीक्षासमयस्य मध्ययुगे सोयं संक्षेपः प्राचलद् यत् परीक्षार्थिनः परीक्षानियतानेव ग्रन्थान् यथावदभ्यास्यन्, परीक्षातो बाहर्भूतान् स्वस्वशास्त्रीयान् ग्रन्थांस्तु जीविकाद्युपार्जनकार्येषु संसक्ततया नाधिगन्तुमशक्नुवन्।

इतोऽग्रे सोयं प्रकारः प्रारब्धो यत्परीक्षानियतेष्वपि मुख्यमुख्या अंशा एव सपरिश्रमं परीक्षार्थिभिरधीयन्ते स्म, न किल ते संपूर्णा ग्रन्थाः। वर्तमानसमये तु संक्षेपस्यापि पराकाष्ठा परिकल्पिता लोकैः। यानि स्थलानि परीक्षकाः पृच्छन्ति, अथवा अतीतेषु वर्षेषु यानि प्रश्नपत्राण्यागतानि तद्गतानेव विषयान् बहवः परीक्षार्थिनोऽभ्यस्यन्ति। सम्प्रति हि प्रायः सर्वासामेव परीक्षाणां गतवार्षिकाणि प्रश्नपत्राणि मुद्रितान्युपलभ्यन्ते। द्रव्यलाभलोभेन तदुत्तराण्यपि संप्रात पण्डितमहाभागैर्मुद्रितानि।

परीक्षाप्रणाल्या नाहमत्यन्तविरोधी। अहमप्येतस्मिन्नेव परीक्षायुगे शिक्षितगोष्ठ्यामन्तर्गणनीयोऽस्मि संवृत्तः। समयेऽस्मिन् परीक्षाप्रकारं विना एतावत्संख्याकानां लोकानां शिक्षासमीक्षणस्य न कथंचित्संभव इत्यहं जानामि। किन्तु

वर्तमानेषु कतिपयवर्षेषु परीक्षार्थिभिर्जनैः परीक्षाप्रकारस्य योयं दुरुपयोग आरब्धस्तस्याहं विरोधी ।

अस्तु एकदेशीयशास्त्रक्रमः परीक्षाप्रणालीयं चेत्युभयोः संदंशे पतितायाः संस्कृतशिक्षायाः सांप्रतं स्वरूपमेव विपर्यस्तम् । न केवलं संस्कृतशिक्षाक्षेत्रे एव अपि तु राजभाषादिशिक्षास्वपि शिक्षायां वास्तवं फलं नाधिगच्छन्ति । अस्ति ममैकं 'घनाक्षरी' पद्यं *'साहित्यवैभवे'—

'चित्तपरिष्कारे या हि शिक्षा भूरिदक्षाऽभवद्
वित्तपुरस्कारेणैव साऽद्य सुपटीयसी
पूर्वपुरुषाणां पुरापद्धतिः प्रकृष्टाऽभव—
न्नव्यपुरुषाणामद्य सरणिर्गरीयसी ।
मञ्जुनाथ जानीयाम दूरदूरदेशकथां
'को धर्मोऽथ, के वयम्' कथेयं तु दवीयसी
वर्तमानकाले बत शिक्षावधूभालेऽलेखि
कालेजेन चारुचित्रमालेयं महीयसी ॥

कीदृशः पाठ्यक्रमः साम्प्रतं योग्यः, एतद्विषये विस्तरः 'संस्कृतरत्नाकरस्य' 'शिक्षाङ्के' द्रष्टव्यः । किन्त्वेवंविधेषु महासंमेलनेषु समवेताः शिक्षाकर्णधारा अमी संस्कृतभाषायाः पाठ्यप्रणालीं व्यवहारोपयोगिनीमपि कर्तुं प्रभवेयुरिति हृदये विश्वस्य, विश्वस्य कर्तारं तथाऽनुग्रहीतुं प्रार्थये इति शुभम् ।

---

*एतन्नामकं नवीनरचनानिबद्धं पुस्तकम् एतन्निबन्धलेखकस्य नाम्ना 'नागरपाड़ा, जयपुर' इति स्थानात्प्राप्यम् ।

॥ श्रीशः शरणम् ॥

अखिलभारतीयसंस्कृतपण्डितपरिषदः स्थायिसंघटनम् तद्द्वाराः
मुखपत्रसंचालनं च

निबन्धकः—गलगली रामाचार्यः मधुरवाणीसहसंपादकः बेलगांव (कर्णाटक)

संस्कृतभाषाया महत्त्वमलौकिकता च ॥

वसुन्धरावलयेऽस्मिन् सर्वाभ्यो भाषाभ्यः संस्कृतभाषैव बहुप्राचीनकालतः प्रवृत्तेति जानीयुरेव अक्षरमुखाः। सेयमेव भाषा भरतखण्डे प्रचलन्तीनामार्यभाषाणां जननी द्राविडभाषाणां पोषणीति च प्रमाणप्रमितोऽयं विषयः। संस्कृतभाषेयं न केवलं पौर्वात्यभाषाणां जन्मदायिनी, अपि तु आङ्ग्लादिपाश्चात्यगिरामपि मातृस्थानीयेति पाश्चात्यपुरातत्त्वविदो मन्यन्ते। संस्कृतभाषोपनिबद्धान् वेदोपनिषदादीन् अपौरुषेयतया सप्रमाणं साधयन्तो दर्शनकारा अस्या भाषाया अनादिकालीनतामाकलयन्ति। दशसहस्रवत्सरेभ्यः प्रागपि वेदानामस्तित्वमभ्युपगच्छन्तः पौर्वात्य-पाश्चात्यसंशोधका अपि इदमेव मतं द्रढयन्ति। अनेन ज्ञायते प्रथमा मानवसृष्टिः संस्कृतभाषासहकृतैवेति। जगदीशेन प्रथमतया सृष्टस्य मानुषशिशोः मुग्धाव्यक्तभाषा संस्कृतमय्येव आसीदिति वचनं नातिशयोक्तिसीमानं स्पृशति। मानवजातेः प्रागेव समुत्पादिता देवजातिरपि अनयैव भाषया व्यवाहरन्निति गीर्वाणवाणीति नाम्नैव स्फुटीभवति। सृष्टिकर्तारं केचन मन्यन्तां वा न वा, परं स्वजातेः प्रथमभाषेति सर्वैः सादरं साभिमानं च कृतज्ञतया सम्माननीया पालनीया पोषणीया चेयम्। पुरातनापीयं भाषा अद्यापि नवयुवतीव सर्वांगपरिपुष्टा मनोहरतराकारा दिव्यभावा समुज्ज्वलगुणा सकलव्यवहारदक्षा च विद्योतते। प्राकृतभाषाजननीयमात्मनोऽप्राकृततां व्यनक्ति सम्यगेव। वेदोपनिषदादिषु गूढातीन्द्रियविषयान् उदात्तप्रगल्भान् विचारान् सुविशदं प्रतिपादयन्तीयं संस्कृतभाषा नूनमात्मनोऽलौकिकतामन्यादृशं महिमानं चाविर्भावयति।

संस्कृतभाषा नाम विविधज्ञानभाण्डागारमेव। तस्याम् अध्यात्मविद्यामारभ्य कुट्टिनीकुटिलतन्त्रपर्यन्तं सर्वेऽपि सुसूक्ष्मा विषयाः साङ्गोपाङ्गं विशदतया समुपवर्णिता उपलभ्यन्ते। प्रामुख्येन अध्यात्मविद्या, साहित्यकला, संगीतविज्ञानम्, आयुर्वेदः, धनुर्वेदः, शिल्पकला, स्थापत्यविद्या, रसायनविद्या, ज्योतिर्विज्ञानम्, अर्थशास्त्रम्, कामशास्त्रम्, द्यूतादिविनोदविज्ञानं, नीतिशास्त्रं, भाषाशास्त्रं, रत्नपरीक्षणादिकला, धातुलोहसंशोधनशास्त्रं, भूगर्भशास्त्रं, गणितशास्त्रं, भूमितिशास्त्रं, अश्वगजादिलक्षणशास्त्रं, युद्धशास्त्रं, चित्रकला, यन्त्र-तन्त्रकला चेत्येवमाद्योऽपरिमिता विषयाः प्रौढतया विवेचिता विस्मापयन्त्याधुनिकानपि विदुषः सर्वतोमुखत्वमहिम्ना।

प्राचीनपण्डितानामलौकिकी संस्कृतभाषासेवा।

तदस्याः संस्कृतभाषायाः सर्वात्मना समुन्नतिशिखरप्रतिष्ठापनश्रेयः, रक्षण-पोषण-संवर्धनसुकृतं च सर्वथा प्राचीनपण्डितमहाभागानेव संश्लिष्यति।

मुद्रणयुगात्प्राक्चिरकालं संस्कृतभाषां पठन-पाठनपरिपाट्या वैभवशिखरमुपनीय तद्द्वारा अत्युच्चतमा सर्वमानवजातेरादर्शप्राया विमला भारतीयसंस्कृतिस्तैरेव पर्यपाल्यत महानुभावैः विश्वहितैकदृष्टिभिः निष्कामवृत्तिभिः । येषां निवासगृहं वने जीर्णकुटीरम्, अशनं कन्दमूलफलानि, वसनानि चीवराणि, वृत्तिरयाचिता, स्वभावः शिशोरिव निष्कपटः सरलश्च, विषयभोगपराङ्मुखी चेतःप्रवृत्तिः, उच्चा विचारसरणिः, शुद्धाऽऽचारपद्धतिः, अनरुन्तुदा मधुरा वाग्धोरणी, निरुपमा निस्पृहता, अखण्डा ज्ञानलालसा, परिवारः विनीताः सहस्राधिकाः विद्यार्थिनः, सहकारतरुमूलमेव महाविद्यालयः, तेषां संस्कृतपण्डितानां महानुभावता कियती वा वर्णनीया ? तदेतदुपलक्ष्यैव भवभूतिना—

> प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
> प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
> पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
> विशुद्धं साधूनामनुपधि रहस्यं विजयते ॥"

इति साधूक्तम् ।

प्राचीनकाले पण्डितानां परिस्थितिः ॥

पुरा निष्कामतया पवित्रकर्तव्यतया ज्ञानप्रसारैकमयजीवितानां तेनैव जन्मसाफल्यं मन्यमानानां विदुषां पोषणभारं समवहन् सार्वभौमः, माण्डलिका राजानः, श्रीलाश्च । सर्वसद्व्यवसायविरोधिन्या उदरचिन्ताया विमोचिता मनीषिणो नैकेषु गहनेषु शास्त्रेषु प्रौढग्रन्थान् प्रणेतुं प्राभवन् । प्रावाहयंश्च लोकेऽविच्छिन्नं ज्ञानप्रवाहम् । विक्रमादित्यकालस्तु पण्डितमार्तण्डमण्डलस्य समूर्जितो मध्याह्नः, कविसुधाकराणां राकारजनी । तस्मिन्नेव काले तस्य संसदि व्यराजन् कालिदासादिनवरत्नानि । अधुनेव ज्ञानप्रसारसाधनविरहकालेऽपि पण्डितानां संस्कृतभाषासेवा असामान्यां महतीमावेदयति ।

आङ्ग्लसाम्राज्यात्पूर्वकाले पण्डितानां स्थितिः ॥

तदा न केवलं हिन्दुभूपालैरेव पण्डिताः सममान्यन्त, अपि तु परधर्मीयैरपि महम्मदीयैः । तेषां सभामलमकुर्वन् संस्कृतसूरयः सादरं सत्कृता वर्चस्वशालिनः । अत्र श्रीमान् पण्डितराजजगन्नाथकविरेव निदर्शनम् । तस्य "असफविलासकाव्यम्", "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः", "दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः" इत्यादि वचनानि नैकशः सन्ति प्रमाणानि । महाराष्ट्रसाम्राज्ये विशेषतः श्रीपेशवेप्रभूणां शासनसमये संस्कृतविदुषामग्रस्थानमासीत् । विजयनगरसाम्राज्येऽपि संस्कृतपण्डितानां प्रभुत्वमासीत् । तदा प्रायो न्यायाधीशस्थानानि संस्कृतपण्डितैरेवालङ्कृतानि । प्रतिवत्सरं महोत्सवावसरे सादरमामन्त्र्य सभायां सममान्यन्त संस्कृतविद्यापारंगताः । एवमार्यावर्तेऽपि सर्वैरपि हिन्दुक्षितिपालैरत्याद्रियन्त गुणिनो गुणलु-

च्चैः । एवं राजाश्रयपोषिताः मनीषिणः प्रतिग्राममार्यसंस्कृतिं तदुद्बोधकसंस्कृतज्ञानं च प्रासारयन् सर्वत्र । मण्डलाधीश्वराः ग्रामाधिपतयो धनिकाश्च संस्कृतप्रेम्णा पाण्डित्यमेषां समुदतेजयन् विपुलधनवितरणेन । एवमाङ्ग्लप्रभुत्वतः पूर्वं राजाश्रयाद् धनिकलोकावलम्बनात् सामान्यजनगौरवाच्च संस्कृतपण्डितानां परिस्थितिश्चिन्ताविधुरा नितान्तमादरणीया चासीत् ।

आङ्ग्लसाम्राज्ये अधुना पण्डितानां स्थितिः ।

पूर्वतना समूर्जिता पण्डितस्थितिः आङ्ग्लसाम्राज्यप्रस्थापनात्प्रारभ्य विदेशीय-विधर्मीय-राजमण्डलानुकूल्यवैकल्याद्वा कालमहिम्ना वा पाश्चात्यशिक्षणप्रभावाद्वा माण्डलीकमहीभृतामौदासिन्याद्वा धनिकजनानामनादराद् विदेशविद्याविमुग्धसुशिक्षितसमाजस्य समुपेक्षणाच्च क्रमेण परिहीयमाना सांप्रतं नितान्तमवनतेश्चरमां सीमां स्पृशतीव ! तेन संस्कृतभाषाया भारतीयसंस्कृतेश्च विलोपप्रसंगः समासन्नप्राय इव संदृश्यते । आङ्ग्लसाम्राज्यप्रारम्भे राजकीयाधिकारिणः संस्थानाधिपतयश्च कंचन कालं प्रावर्तयन् संस्कृतविद्यापरंपराम् । तन्निदर्शनं तु महाराष्ट्रे पेशवेप्रभुत्वेऽस्तंगते प्राचीनज्ञानरक्षणार्थं प्रथमं पुण्यपुरे प्रास्थाप्यत संस्कृतमहाविद्यालयः । पेशवेप्रभुभिः प्रतिवत्सरं विद्वत्संभावनार्थं देयद्रव्येण संस्कृतप्रसारायैव महाविद्यालयः प्रचाल्यत इति प्रथममाश्वासयन् जनतां राजकीयाधिकारिणः । परमचिरादेव संस्कृतं संस्कृतपण्डितांश्च अग्रस्थानात्प्रच्याव्य विद्वत्संभावनावित्तेन प्रचालितः स विद्यालयः पाश्चात्योच्चशिक्षणसंस्थात्मना पर्यणंसीद् "डेक्कन कालेज" इति नामान्तरमनुप्राप्तः । संस्कृतपण्डितैः प्राप्यं प्राचीनदक्षिणारूपं धनं संस्कृतेतरविषये पदवीधरेभ्यः समर्पितम् । संस्कृतप्रधानस्थानमाङ्गलभाषया आत्मसात्कृतम् । तदिदं दक्षिणाद्रव्यमिदानीमाङ्गलविद्यालयछात्राणां शिष्यवृत्तये 'दक्षिणा फेलोशिप' नाम्ना प्रथितम् । एवमन्यैश्च कारणैः सम्प्रति पण्डितवर्गस्य संस्कृतभाषायाश्च महती विपत्तिः समुपस्थिता ।

पण्डितानां सांप्रतिकी साम्पत्तिकी स्थितिः ॥

राज-प्रजाश्रयवैकल्येन पण्डितवर्गोऽयं सांपत्तिकस्थित्या शोचनीयां दशामनुभवति । न्यायाधिकरणे धार्मिकशासननिर्णयाधिकारस्थानं, विद्यालये महाविद्यालये च संस्कृताध्यापकपदं च लुप्तमेव संस्कृतपण्डितानाम् । अन्येभ्यो दत्तमेतत्पदम् । विशेषतो मुम्बाप्रान्तविभागे उच्चविद्यासंस्थासु संस्कृतविदुषां पदानि अवसादितानि । अत्र विश्वविद्यालयसंस्थायां इतरप्रान्तेष्विव नास्ति संस्कृतविद्यापरीक्षा, समुत्तीर्णेभ्यः पदवीदानं च । एवमवस्थायां कुतो विद्यालयस्य महाविद्यालयस्य प्रत्याशा ? मद्रप्रान्ते वङ्गदेशे युक्तप्रान्ते च विद्यालयपीठेषु पण्डितानां नातिशोचनीया न वाऽप्यभिनन्दनीया स्थितिर्विद्यते । एवं च सर्वत्र पण्डितानां जीवनसाधनानि नोपलभ्यन्ते ।

संस्कृतपण्डितसंघटनाया आवश्यकता ॥

संस्कृतवाग्देवताया विहारभवनायमाने भारतेऽस्मिन् सांप्रतं संस्कृतभारत्यां प्रायः सर्वत्र महानवज्ञाप्रयश्चानादरो दिने दिने वर्धमानदशामापद्यमानो दरीदृश्यते ।

क्वचन विद्वेषविषवायुरपि वहति परितः । तेनाऽस्य भारतदेशस्य भाविनीमनर्थ-परंपरामुदीक्ष्य कम्पते हृदयं विषादभरभुग्नं भारतहितैषिणाम् । यस्मिन् भारते प्रतिभाप्रभाभासुरा विश्वविस्मयावहा दर्शनकृतः, दिगन्तविश्रान्तयशसः कवि-प्रवरा ऽधराजन्; यस्मिंश्च आबालमास्थविरं सर्वे जना ललनाश्च संस्कृतगिरा ऽव्यवहरन्ति स्म, तस्मिन्नेव देशे बहुसंख्यया संस्कृतगन्धविधुरान् संस्कृते समुदा-सीनान्, कांश्चन विद्वेषिणश्च विलोक्य कस्य वा सचेतसो मनो न दूयेत ? एवमेव समुदासभावे अनादरे च क्रमेणोपचीयमाने विद्वेषेणैक्यमापन्ने संस्कृतसरस्वती नामशेषतामुपेयादिति शंकते चेतः । संस्कृतगिरश्चास्तित्वाभावकल्पनाऽपि रोमाञ्चमुत्पादयति भयेन । संस्कृतं नाम भारतीयानां जीवनसर्वस्वम्, नवचैतन्या-वहं संजीवनौषधम्, अमरतापादकममृतम्, त्रिकालदर्शकममलं दर्पणम्, स्फूर्तिझरीप्रस्रवणम्, निश्रेयसनिदानम्, सुख-शान्तिसागरः, पितृपैतामहप्राप्त-श्चालयो महीयान् निधिनिक्षेपः, ज्ञान-विज्ञानकासारः, सकलेष्टार्थप्रदः कल्पतरुः, तापत्रयतिमिरभास्करः, कविचकोरसुधाकरः धर्मदेवताया आधारस्तम्भः सर्वादृतसर्वोच्चसंस्कृतिलतायाः उपघ्नतरुः, ज्ञानपिपासूनां गङ्गाप्रवाहः, सर्ववि-द्यानां महीयानाकरः, भिन्नभिन्नभाषासंकुलिते भारते सर्वैरवगम्यमानवैज्ञानिक-शब्दनिर्माणे शक्तिसंपन्नम्, आध्यात्मविद्याप्रसवभूमिश्च । विविधसुखभोगसमृद्धेषु विपुलैश्वर्यसंपन्नेष्वपि परराष्ट्रेषु यस्य महिम्ना सहस्रमुखगीयमानं दुर्गतमपि भरतखण्डमिदम् गौरवास्पदं पदमध्यास्ते; तस्य संस्कृतस्य सर्वात्मना ह्रासे क्रमेण विलोपे च भरतवर्षोऽयं प्राणकलाविकल एव जायेत । अतो भारतहितै-कदृष्टिभिः महाशयैः सर्वतः प्रथमं संस्कृतभाषासमुदयकर्मणि, यावद् भारतं न विनश्येद्, यावच्च संस्कृतविद्या अङ्गुलिपारगणनीयेषु विद्वत्सु कथंचिदपि प्राणा-नवलम्बेत तावदेव बद्धपरिकरैः भाव्यम् । अन्यथा स्मृतिशेषतामुपगतायां गैर्वाण्यां कृतो महीयानपि प्रयत्नो विनिर्गते सलिले सेतुबन्धनमिव, निर्यातेषु प्राणेषु शरीरे रसायनप्रयोग इव वैफल्यमापद्येत । तदिदानीं सत्वरमेव प्रवर्त्यतां दक्षैर्महाभागैः ।

तदस्मिन् महति श्रेयस्करे कर्मणि के वा प्रवर्तन्तामित्येको जटिलः प्रश्नः परिस्फुरति पुरतः । लोके महत्तमं कार्यं राजाश्रयाद् भूयसां लोकानामवलम्बनात् श्रीमतां साह्यय्याद्, विदुषां प्रयत्नाच्च सिद्धिपथमुपयाति । तत्र सार्वभौमस्तु राजा विदेशीयः । ततः संस्कृतभाषाया अभ्युदयापेक्षा अपेक्षितुरेव मुग्धतां प्रकटयति । माण्डलिकास्तु भूपाला भारतीया अपि स्वपूर्वजपरिपोषित-परि-वर्द्धितसुरसरस्वतीमाहिमानभिज्ञानाद्वा विविधव्यापारनिमग्नतया वा मही-यस्यास्मिन् कर्मणि न मनोयोगं ददते अनावश्यकेषु कार्येषु विपुलं धनराशिं विकिरतोऽपि । महैश्वर्यसंपन्नास्तु भाग्यशालिनो वदान्या अपि मनसाऽपि नाकलयन्ति विषयमेनम् । सामान्यजनानां तु स्वोदरचिन्ताक्रान्ततया एतादृश-विषयविचारायापि नावकाशः । विद्वत्सु, पाश्चात्यविद्याविभूषिताः केचन अनादरभाजः, अपरे उदासीना, अन्ये विरोधिनश्च । वैदेशिकविद्यागन्धविधुराः

संस्कृतविद्यैकपारंगतास्तु मनीषिणः स्वभावाद्वा जनानां दृष्टिकोणपरिवर्तनाद्वा, सर्वैरुपेक्षिता लक्ष्मीकृपाकटाक्षस्य अविषयीभूता जनसंपर्कभीता अध्यापनमननैकमग्ना बाह्यव्यापारानभिज्ञा महान्दोलनसाध्यं भूरिप्रयत्नगम्यं महत्तममिदं कार्यं कर्तुं न समुत्सहन्ते, नापि क्षमन्ते। एवं च सर्वेषां भारतीयानां परिस्थित्यां संस्कृतभाषोन्नतेराशाया अपि कावकाशः?। तथापि क्वचिदस्ति आशाङ्कुरस्यावसरः। ये पाश्चात्यविद्यानिष्णाताः संस्कृतप्रणयिनो भारतहितैषिणः कर्तृत्वशक्त्या प्रथितयशसो राजमान्याः प्रजाविश्वासभाजश्च विरला एव सन्ति महात्माऽऽङ्गो भारते पण्डितमदनमोहनमालवीय-राधाकृष्णन्सदृक्षास्तथा उच्चाधिकारपदाधिरूढा विद्याविभागाधिकारिणो, विधिमण्डलसदस्या, न्यायाधीशा, व्यवहाराजीविनः (वकील) देशभाषापत्रिकासंपादकाश्च ते यदि अनाथाया मुमूर्षुशय्यामधिष्ठितायाः सुरभारत्याः समुद्धारे अव्याहतं महान्तं प्रयत्नं विदधीरन्, तर्ह्येव संस्कृतसमुत्कर्षस्य पण्डितानां गौरवस्य उपजीवनस्य च प्रत्याशा। अन्यथा न कथंचनात वाढमाचक्ष्महे। अस्याः परिषदो दर्शनेन तादृशा महानुभावा भारतीयानां सुदैवेन कर्मण्यस्मिन् प्रवृत्ता इति विज्ञाय अचिरादेव सुरांगरः समुन्नतिप्रत्याशया प्रमोदते नश्चेतः। ईदृशैश्च महाभागैः संस्कृतपाण्डतानां साहाय्येन कृतः प्रयत्नो महदान्दोलनं च अल्पीयस्येव समये महतीमेव फलसंपत्तिमवाप्नुयादिति द्रढीयान्नः प्रत्ययः। संस्कृतपण्डिता अपि आत्मनः सहजमौदासीन्यं दृढमेकान्तप्रियतां निरुत्साहतां च दूरीकृत्य अहमहमिकया संघशः पुरस्सृत्य तदस्मिन् पवित्रतमे सर्वेषां क्षेमावहे विशेषतः आत्मन एकयोगक्षेमावहे कर्मणि स्वयं स्फूर्त्या प्रवर्तेरन्। एवं च संस्कृतसमुद्धारे उभयपण्डितानामेकमतीनां सम्मेलनमावश्यकम्। नेदं कार्यं संस्कृतपण्डितान्विहाय लोकादरभाजनैरपि पाश्चात्यविद्याविशारदैः निर्वोढुं शक्यते। नापि लोकेऽविज्ञातप्रभावैः केवलं संस्कृतपण्डितैरपि फलेग्राहित्वमापद्यते। अतः उभयविधविद्वद्भिर्मिलित्वैव कार्यकरणे सत्वरमेव सिद्धिपथमुपेयात्। राष्ट्रीयसभेव हिन्दूसभेव अखिलभारतीयसंस्कृतप्रणयिनां संस्कृतपरिषन्नाम्नी समग्रभारतव्यापिनी संस्था स्थापनीया। केवलं संस्कृतपण्डितपरिषदः स्थापनेन स्थायिसमितेर्निर्माणेन च नाधिकं कार्यं संपत्स्यत इति प्रामाणिकोऽनुभवसिद्धोऽभिप्रायः। एवमभिप्राये केचन संस्कृतसूरयो विमनायेरन्। परं किं करणीयम्? वस्तुस्थित्यपलापे अवश्यवक्तव्यानुक्तौ च संस्कृतस्यैव महती हानिः स्यादित्यगत्या साम्प्रतिकी परिस्थितिः स्पष्टमावेदनीया कार्यसिद्ध्यैकदृष्ट्या। कार्यसिद्धये आवश्यकगुणाश्च लोकप्रियत्वं, राजकीयमण्डले वर्चस्वं, संस्थानाधिपेषु गौरवास्पदता, श्रालवश्यात्वं, कष्टसहिष्णुत्वं, सततकार्यप्रवणता चेत्येवमादयो विपुलतया इह लौकिककार्यकर्तृषु दृश्यन्ते। परं नैष दोषो यदीदृशगुणविरहः संस्कृतपण्डितानां परमार्थविचारैकानरतानाम्। एवं च संस्कृतसमुन्नतिकाङ्क्षिणाम् अखिलभारतीयानां लौकिक-पण्डितानां काचन महती संस्था आवश्यकी स्थापनीया प्रचालनीया च। तस्याश्च कार्यकारिणी स्थायिसमितिरप्येका संघटनीया। तत्र प्रत्येकप्रान्तस्य साम्येन प्रातिनिध्यं स्यात्।

तस्या उद्देशाश्च (१) संस्कृतभाषायाः प्रसारः, (२) प्राचीनसंस्कृतिसंरक्षणम्, (३) संस्कृतपण्डितानां सांपत्तिकस्थितिसुधारणा, (४) संस्कृतभाषायाः पण्डितानां च राजकीयमण्डले लोके विद्यापीठेषु समुचितगौरवास्पदस्थितिसंपादनम्, (५) स्वतन्त्रतया संस्कृतविद्यापीठस्थापनम्, (६) संस्कृतविद्यान्तर्गतगूढतत्त्वसंशोधनम्, (७) संस्कृतपण्डितेषु समुचितं यावदावश्यकमर्वाचीनज्ञानसंवर्द्धनम्, (८) प्रचलितदेशभाषासु संस्कृतभाषायाः सामरस्यापादनं च।

संस्कृतपरिषदः अधिवेशनं प्रत्यब्दं भारते भिन्न-भिन्नप्रान्ते प्रवर्तनीयम्। तस्याः स्थायिसमित्या यावदेकवत्सरं सर्वैः संस्कृतप्रणयिभिः निर्वर्तनीया कार्यकलापप्रणाली निर्धारणीया। अस्याः सभायाः संघटना राष्ट्रीयसभाया इव देशभाषासाहित्यपरिषद इव वा विधेया। सदस्यताधनेनैकरूप्येण भाव्यम्। अस्याः सभायाः कार्यविशेषस्तु सामान्य-जनेष्वपि हिन्दूधर्मप्रसारणम्।

अस्याः सभाया उद्देशप्रसारार्थं प्रतिप्रान्तं देशभाषया मासपत्रमेकं संचालनीयम्। येन सामान्यजनेषु संस्कृते आदरः पण्डितेषु सगौरवसहानुभूतिर्जायेत। तथा समग्रे भारते एका, शक्यं चेत्प्रतिप्रान्तमेकैका साप्ताहिकी संस्कृतपत्रिका, बृहदाकारा विविधविषयभासुरा सर्वाङ्गसुन्दरा मासपत्रिकाऽपि संचालनीया। येन लोके संस्कृतमहत्त्वं ज्ञायेत, संस्कृतवाचनाभिरुचिश्च वर्धेत।

संस्कृतपरिषदः स्थापने तदङ्गतया, अस्थापने च स्वतन्त्रतया संस्कृतपण्डितपरिषदः स्थापनं स्थायिसमितेश्च संघटनमत्यावश्यकम्। संस्कृतपरिषदुद्देशा एवास्या उद्देशाः। तथा अन्येऽपि उपयुक्ता उद्देशाः स्युः। यत्र पण्डितानां सुखदुःखविचारः स्वधर्माविरोधेन अर्वाचीनज्ञानायत्तीकरणम् संस्कृतविद्यानां प्रसरणोपायचिन्तनमित्येवमादिकं कार्यं स्यात्। मिथः सौहार्दं जायेत। सोत्साहं कार्यप्रवणता भूयात्।

एवं निर्दिष्टकार्यकरणेन अचिरादेव संस्कृतं पुनरुन्नतिपथमीयात्, संस्कृतपण्डितानां च सर्वात्मना श्रेयः स्यादिति बाढं विश्वसिमः। तदेतत्कार्यं सफलं भूयादिति भगवन्तं विश्वेश्वरं सभक्त्युन्मेषं संप्रार्थयाम इति शम्॥

धर्मादरप्रस्थापनमार्गः।

(ले०—तर्कसाङ्ख्यतीर्थ, धर्मपारीण, पं० रघुनाथशास्त्री कोकजे, पो० लोणावला, जि० पुणे)

योऽसावनादरो दरीदृश्यते हिन्दुसमाजे स्वधर्मविषये, तस्य निदानं प्रथमतः करणीयम्। न खलु प्रशस्तेऽनादरः प्रवर्तते। प्रशस्तं सुखदं वा विषयं न कोपि परिवर्जयति। अपि तु सर्वः कान्तमात्मीयं पश्यतीति न्यायात्तमेव प्रापयितुं यतते। धर्मे यः खल्वनादरस्तत्र तस्य प्रशस्तत्वाज्ञानमेव प्रथमं कारणम्। इदानींतना ये हिंदुसमाजे धर्मनियमा धर्माचारा वा दृश्यन्ते ते केवलं गतानुगतिकत्वेनैव सेव्यमाना न चिकित्सकमतीनां सहृदयानां संतोषाय भवन्तीति धर्मधुरीणैः पर्यालोचनीयम्। तथा पर्यालोच्यमाने तु 'हा! हतो धर्मः, जितमधर्मेण' इत्यादिकोलाहलेन केवलेन कथमपि न भविष्यति धर्मोन्नतिरिति सुधीभिरवगन्तव्यम्। धर्मोन्नत्यै धर्मादरप्रस्थापनाय वा तादृशमेव विवेचनमावश्यकं येन धर्मनियमानां धर्माचाराणां च प्राशस्त्यं बुद्धावारूढं भविष्यति।

प्राचीनग्रन्थानां विवेचनसरणिः

धर्मशास्त्रे खलु ग्रन्थदारिद्र्यं नास्ति। शतशः सहस्रशो वा ग्रन्था उपलभ्यन्ते धर्मशास्त्रे। तथापि ते श्रद्धालुमेवोपकुर्वन्ति। न खलु ते चिकित्सकमतीनां परितोषायालं भवन्ति। यस्मात्तेषु केवलं विधिनिषेधानामेव वर्णनं दरीदृश्यते। तत्र कारणं तु प्रायशो न केनापि प्रतिपाद्यते। स्वरसतः खलु ये न ग्रन्थप्रामाण्यबद्धादरास्ते न भवन्ति समाहितमनसः केवलं विधिनिषेधश्रवणमात्रेण। एवं च विधिनिषेधबीजभूता तत्त्वसरणिर्यावन्न प्रदर्श्यते तावन्नैव धर्मादरः प्रस्थापयितुं शक्यते।

वैदिकी सरणिः

वेदेषु हि सरणिरियमेवाङ्गीकृतासीदिति वक्तुं शक्यते। न केवलं विधिवाक्यानि वेदैः प्रतिपाद्यन्ते किन्त्वर्थवादसहितानीत्यस्येदमेव कारणम्। ते चार्थवादा विध्युक्तकर्मप्राशस्त्यं प्रतिपादयन्ति। ततश्च विध्युक्तकर्मप्राशस्त्यं विज्ञायते। वेदे तावत्

"सुप्रीणितिश्चिकितुषो न शासु।" ऋ. १. ७१. १।

"प्र नु वोचं चिकितुषे जनाय।" ऋ. ८. ११. १५।

"यद्ध किं च विचिकित्सति श्रेयसि हैव भ्रियते।" शतपथ २. २. ४।

"यदेव किंचानूचानोभ्यूहति आर्षमेव तद्भवति।"

इत्यादि वचनजातेषु चिकित्साया माहात्म्यं कण्ठरवेण प्रतिपाद्यते। भगवद्गीतास्वपि—

"मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥"

इत्यादिवचनजातेनायमेवार्थः प्रतिपादितः । वेदेष्वनन्तरग्रन्थेषु च योऽयं दृश्यते चिकित्सासमादरः स इदानीन्तनेषु धर्मग्रन्थेषु न दृश्यते । अत एव न ते ग्रन्था न वा तत्प्रतिपाद्या धर्माः समाद्रियन्ते हिन्दुभिराधुनिकशिक्षानिपुणैः ।

प्रवृत्तिशास्त्रराद्धान्तः

न केवलं वेदपर्यालोचनेन किंतु प्रवृत्तिशास्त्रपर्यालोचनेनाप्येतदेव सिद्ध्यति । इष्टसाधनताज्ञानं हि प्रवर्तकमिति दार्शनिकानां राद्धान्तः । इष्टं च मुख्यतः सुखं, * दुःखनाशः, परंपरया तत्साधनान्यपीति न विपश्चिदपश्चिमानां तिरोहितम् । धर्मस्य यदि प्रवर्तकत्वमपेक्षितं तदा तस्य सुखसाधनत्वप्रदर्शनमत्यावश्यकम् । 'बुद्धिपूर्वकारिणो हि पुरुषा यावत् प्रशस्तोयमिति नावबुध्यन्ते तावन्न प्रवर्तन्ते' इति वदता कुमारिलेनाप्ययमेवार्थोऽङ्गीकृतः । तदेवं धर्मस्य सुखसाधनत्वज्ञानं विना धर्मे प्रवृत्तिरशक्येति धर्मप्रवृत्त्यर्थमपि सुखसाधनत्वप्रतिपादकधर्मग्रन्थावश्यकता सिद्ध्यत्येव ।

आक्षेपविशेषः

अत्रापरे प्रत्यवतिष्ठन्ते—"ऐहिकं सुखं यदि धर्मफलं स्यात्तदा पुरुषबुद्ध्यो चिकित्सापुरःसरं तत्प्रतिपादनं सुशकं भवेत् । तदेव तु न संभवति । धर्मस्यादृष्टफलकत्वात् । अदृष्टं च फलं देहपातादनन्तरं स्वर्गादावुपलभ्यमानं कथं पुरुषबुद्ध्या विविच्येत ? तस्माच्चिकित्सापूर्वकं धर्मविवेचनमशक्यमेव । अङ्गीकृतोऽयमेवार्थः सर्वथा 'चोदनालक्षणोऽर्थो धर्म' इति वदता जैमिनिना पूर्वमीमांसायाम् । शङ्कराचार्यैरपि 'शब्दैकसमधिगम्यस्त्वयमर्थो धर्मवत्' इति वदद्भिरिदमेवोट्टङ्कितम् ।" इति । सोयमाक्षेपः प्रथमतः परिहर्तव्यः । आक्षेपकास्त्वेते धर्मस्य चिकित्सायाश्च भिन्नौ पन्थानौ मन्यन्ते । सोऽयं तेषां ग्रहः साधुरसाधुर्वेति प्रथमतः परीक्षणीयम् । तदर्थं कीदृशं धर्मफलं तच्च पुरुषमतिग्राह्यं न वेति प्रथमतो विचारणीयम् ।

धर्मफलविचारः

श्रुतिस्मृतिपुराणेषु हि बहुशो धर्मलक्षणानि समुपलभ्यन्ते । तेषां पर्यालोचने तु धर्मफलमैहिकं पुरुषबुद्धिग्राह्यं चेत्येव सिद्ध्यति । तथा हि

"धर्मो विश्वस्य जगतः प्रतिष्ठा ।" नारायणोप० ।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥" मनु० ६.९२ ।

"यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः ।
धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम् ॥ रामा.३.९.३० ।

"धर्मादर्थश्च कामश्च ।" म.भा.शान्ति.१०६ ।

"लोकयात्रार्थमेवेह धर्मस्य नियमः कृतः ।" म.भा.शान्ति.२८६ ।

इत्यादौ धर्मस्यैहिकी समाजव्यवस्थितिस्तदुपयोगिनो गुणा वा धर्मलक्षणत्वेनोक्ताः । वात्स्यायनेन तु न्यायभाष्ये (४.१.६२)

* "यदा वै सुखं लभतेऽथ करोति, नासुखं लब्ध्वा करोति, सुखमेव लब्ध्वा करोति । छान्दोग्य ७-२२-१ ।

'लोकव्यवहारव्यवस्थापनं धर्मशास्त्रस्य विषयः'
इति वदता तदेवाङ्गीकृतम् । दक्षेण तु
"सुखं वाञ्छन्ति सर्वे हि तच्च धर्मसमुद्भवम् ।
तस्माद्धर्मः सदा कार्यः सर्ववर्णैः प्रयत्नतः ॥ ३०२५"
इति वदता धर्मस्य स्पष्टमैहिकं फलमभ्युपगतमित्यत्र नास्ति विवादः । एवं च यदि धर्मस्यैहिकोत्कर्षस्तदुपयोगिनो वा गुणाः फलमिति सर्वसंमतं तदा कथं पुरुषबुद्धिर्विचिकित्सा वा धर्मनिर्णयासमर्थेति सुधीभिर्विभावनीयम् ।

जैमिनेरभिप्रायः

'चोदनालक्षणोऽर्थो धर्म' इति लक्षयता जैमिनिनापि लक्षणे अर्थपदस्य समावेशनात् अर्थानर्थकरत्वस्य च पुरुषबुद्ध्यवधारणीयत्वान्न तस्यापि धर्मे चिकित्साप्रवेशोऽसंमत इत्यवश्यमङ्गीकरणीयम् । वस्तुतः पूर्वमीमांसायां यागस्यैव प्रतिपादनात् तस्य च दृष्टफलप्रदर्शनं दुर्घटं मन्यमानेनैव जैमिनिना श्रौतधर्मस्यैव तथा लक्षणमङ्गीकृतं न पुनर्वर्णाश्रमाचारपरस्य स्मार्तस्येति न कापि हानिः । न चैवमङ्गीक्रियमाणे धर्मविशेषेऽदृष्टमितरत्र च कुत्रचिद्दृष्टमित्यर्धजरतीयन्यायापात इति वाच्यम् । न्यायमात्रस्याकिञ्चित्करत्वात् । अन्यथा सर्वेक्षुन्यायापातात् । न हि मध्यमं काण्डमिक्षुदण्डस्य चोष्यमिति मूलमपि तस्य चोष्यतामापद्यते । इदं च वस्तुगतिमनुरुध्य समाधानमुक्तम् । यज्ञकाण्डस्य यदि विशेषतः पर्यालोचनं क्रियते तदा तस्यापि दृष्टफलकत्वप्रदर्शनं नाशक्यं किन्तु विस्तारभयात् प्रकृते च स्मार्तधर्मस्यैव विचारणीयत्वान्न श्रौतधर्मनिरूपणमावश्यकं प्रतिभाति । किं च जैमिनेरभिप्रायः श्रुतिस्मृतिवत्सर्वथा प्रामाण्यं भजते इति नैवाङ्गीकरणीयम् । नागोजीभट्टादिभिर्मार्कण्डेयपुराणाद्युपन्यासपुरस्सरं तस्य विनिन्दितत्वात् । तथा हि लघुमञ्जूषायामेवं प्रतिपाद्यते—

'किंच जैमिनेरेव सर्ववस्तुतत्त्वज्ञताभावो मार्कण्डेयपुराणादवगम्यते सुतरां तदीयानाम् ।

ईशसिद्धिमयाद्वेदशास्त्राप्रामाण्यमीयुषाम् ।
मानकृज्जैमिनिमुनिः केन मानेन सिद्ध्यति' इति ।

यदपि च मीमांसादर्शनं समन्वयपद्धतेर्मीमांसापद्धतेर्वा पुरस्कारार्थमाद्रियत इति केषांचिन्मतं तदपि न सर्वसंमतम् । माधवाचार्यैरेव पराशरस्मृतिव्याख्यानप्रस्तावे तस्या निन्दितत्वात् । तथा हि

"स्मृत्यन्तरानुसारेण विषयस्य व्यवस्थितिः ।
कल्पनीयेति चेद् ब्रूहि सर्वज्ञं मन्यसे कथम् ॥
स्वेन दृष्टास्तु यावत्यस्तासामित्ययुक्तिमत् ।
क्वचित्कदाचिदन्यासां दर्शनादव्यवस्थितेः ॥
अत एव निबन्धेषु दृश्यते नैकवाक्यता ।
सर्वथापि त्वया प्रोक्तां निर्मूलां बुद्धिकल्पिताम् ।
कामाकामादिभेदेन नाङ्गीकुर्मो व्यवस्थितिम् ॥
स्मृतिव्याख्यातृभिः सर्वैर्वचनानां व्यवस्थितिम् ।
ब्रुवाणैर्मन्दमतयो व्युत्पाद्यन्ते हि केवलम् ॥"

इत्यादिवचनजातेन माधवाचार्यैरपि मीमांसापद्धतिर्दत्ताञ्जलिः कृतेति सुधीभिर्निर्मत्सरैर्विभावनीयम्। युक्तं चैतत्; धर्मनिर्णये मीमांसापद्धतिः प्राधान्यं भजते इति तु सर्वथा अन्याय्यमेव।

"धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥"

इत्यादौ श्रौतक्रियासु इतिकर्तव्यताभागपूरणार्थमेव तस्या अङ्गीकरणीयत्वात्। स्मार्ते तु वर्णाश्रमधर्मे, तस्याः प्रामाण्याश्रयणं सर्वथा परंपराविरुद्धमेव। तदेवं मीमांसकैस्तदनुयायिभिर्वा समन्वयपद्धतिमालम्ब्य यद्धर्मे ग्रन्थप्रामाण्यमेव वरीवर्ति तत्र चिकित्सायाः पुरुषबुद्धेर्वा प्रवेशो नास्तीत्युद्घोष्यते तदविचारितरमणीयमेव। विचारचातुरीचतुरैस्तु तदेतन्मोहजालं सुदूरमपास्योपरिष्टात् प्रदर्शितं श्रुतिस्मृतिपुराणेतिहासवचनजातमूरीकृत्य चिकित्साश्रयपूर्वकमेव धर्मनियमधर्माचारविवेचनं करणीयम्। तथा सति धर्माचाराणामैहिकोन्नत्या संबन्धः सुस्पष्टो भविष्यति प्रवर्त्स्यन्ते च तादृशं फलं दृष्ट्वा धर्ममार्गे हिन्दवः।

ऐहिकफलमाहात्म्यम्

सत्यपि धर्माचाराणामामुष्मिके फले तेषां दृष्टमेव फलं धर्मप्रवर्तनायालं भविष्यति। यस्माद्वर्तमाने हि फले पुरुषस्य दृढं प्रीतिबन्धो भवति। उक्तं च कुमारिलेन तन्त्रवार्तिके (१.२.३)

"सर्वलोकस्य भूतभविष्यदनादरेण वर्तमानोपकारानुरागात् न भूते भाविनि वा तादृशी प्रवृत्तिर्यादृशी वर्तमाने।"

इत्यादि वचनजातेन। श्रुतावपि

"को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वा।" तै.सं.७.२.२

इति परलोकास्तित्वविषयेऽनादरोऽत एव युज्यते। प्रत्युत तत्र तत्र लौकिकफलनिर्देशपुरस्सरमेव धर्माचारेषु प्रवर्तनं दृश्यते। तथा हि स्वाध्यायप्रशंसायां शतपथब्राह्मणे (११.८.७.६)

"प्रिये स्वाध्यायप्रवचने भवतः। युक्तमना भवत्यपराधीनः, अहरहरर्थान् साधयते, सुखं स्वपिति। परमचिकित्सक आत्मनो भवति। इन्द्रियसंयमश्चैकात्मता च प्रज्ञावृद्धिर्यशो लोकपक्तिः।"

इत्यत्र दृष्टानामेव फलानां विवेचनं दृश्यते। नारायणोपनिषदि दानफलवर्णनेऽप्येवमेव दृष्टफलविवेचनं श्रूयते। वैदिके समये दृष्टफलानां विवेचनमासीदत एव तदा लोकानां धर्मे प्रवृत्तिरासीदिति किमु वर्णनीयम्? इदानीन्तनास्तु निबन्धकाराः सर्वथा दृष्टार्थानपि धर्मनियमानदृष्टार्थत्वेन बलाद्वर्णयन्तो दृश्यन्ते। तदेतत्सर्वथा धर्मविघातायैव भवति।

उन्नत्यर्थमभ्यासावश्यकता

सोऽयं विघातश्चेन्निवारणीयस्तदा दृष्टविधया धर्मशास्त्राभ्यासः प्रथमत आवश्यकः। विद्यमानं सर्वमपि धर्मनिबन्धवाङ्मयमट्टहासेनादृष्टार्थत्वमेव धर्मा-

चाराणां प्रतिपादयति। तथापि मूलस्मृतिसूत्रादिपर्यालोचने कृते क्वचिदर्थवाद-समाश्रयेण क्वचित् कल्पनया फलसंदर्भनिर्धारणं कठिनमपि नाशक्यम्। चिकित्सकैः पण्डितैरास्थापूर्वकं समालोच्यमाने तथाविधं बुद्धिग्राह्यं धर्मविवेचनं नाशक्यम्। अतः पण्डितैः धर्मोद्धाराय प्रथमत एतादृशः प्रयत्नः समाश्रयणीयः।

परिवर्तनावश्यकता

पण्डितैः सर्वथा स्थितस्य गतिश्चिन्तनीयेति न्यायेन पर्यालोचनं न कार्यम्। क्वचिदधर्मस्यापि धर्मत्वेन प्रतिपादनात्। अधर्मस्य धर्मत्वं द्विधा संपद्यते। क्वचिन्मोहात् क्वचित्कालात्ययात्। प्रथमस्योदाहरणं नियोगः। स च वेनेन मोहाद्धर्मत्वेनाङ्गीकृतः। अपरस्य तूदाहरणं यज्ञीया पशुहिंसा। यदा खलु सर्वेऽप्यार्या मांसाहारपरा आसन् तदा 'यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः' इति न्यायेन यज्ञेऽपि पशुमांसोपयोगो धर्मपर एवासीत्। परन्तु यदा वयं शाकाहारैकपरा मांसविमुखाश्च संपन्नास्तदापि केवलं परंपरामालम्ब्य यज्ञे पशुवधो धर्मत्वं नार्हति। विस्तरेण चैतत्प्रतिपादितं महर्षिभिरिन्द्रयागप्रसङ्गे। अनूदितं च तद्वायुपुराणे। तत्र महर्षीणामुक्तिः

> "न वः पशुवधस्त्विष्टस्तव यज्ञे सुरोत्तम।
> अधर्मो धर्मघाताय प्रारब्धः पशुभिस्त्वया।
> नायं धर्मो ह्यधर्मोऽयं न हिंसा धर्म उच्यते॥" अ.८७

इत्येवं स्पष्टमेव दृश्यते। मनुयाज्ञवल्क्यादिभिर्द्वादशविधाः पुत्रा उक्ताः। परन्तु कलियुगे औरसदत्तकयोरेव धर्म्यत्वमङ्गीकृतम्। अत्रापि परिवर्तनमेव स्वीकृतं धर्मशास्त्रकारैः। एवं च धर्मनियमानां धर्माचाराणां च यथावत् परिशोधनं कृत्वा कुत्रचित् परिवर्तनमप्यावश्यकम्। विशेषत इदानीन्तनानां जनानां जीवनकलह-पीडितत्वं दुर्बलत्वं चावेक्ष्य कतिपयधर्मबन्धनशैथिल्यमाचाराणां विस्तृतानां संक्षेपोप्यत्यावश्यकः।

परिवर्तनसरणिः

अनन्यगतिकतया तु परिवर्तनमेतादृशं भवत्वेव। परन्तु तत्र शास्त्रीयमधिष्ठानं न भवति। सुयोग्यं परिवर्तनं चेदावश्यकं तदर्थं समानविचारयुक्तानां देशसमयसमाचारज्ञानां पूर्वाचार्यबद्धादराणां तदपरतन्त्रमतीनां च विदुषामेकत्र परिषद्रूपेण वा मण्डलरूपेण वा विचारसंघर्ष आवश्यकः। विषये चास्मिन् पण्डितप्रकाण्डा अपि रूढिपरतन्त्राः पाश्चात्यैकबद्धादरा वा भारतीयोज्वलपरंपराभिमानविधुरा न सर्वथा कार्योपयोगिनो भविष्यन्ति। सांप्रतं त्वेतादृशा विद्वांसोऽतीव दुर्लभाः। ये तु विरलतरा महाराष्ट्रवङ्गद्राविडगुर्जरयुक्तप्रान्तादिषु वर्तन्ते तेषामेकत्र मेलनं न भवति। अत एव धर्मोद्धारेच्छुनामप्येतेषां प्रत्यक्षतो धर्मोद्धारायोपयोगो न भवति। यद्येतादृशानां विदुषां संघो भविष्यति तदा सांप्रतिकानां जनानामतीव तदुपकाराय स्यात्। यदि समयज्ञाः पण्डिताः समेत्य तेषां धर्ममार्गप्रदर्शनं कुर्युस्तदातीव तेषामुपकारः स्यात्। यस्माद्वर्णा-

श्रमस्वराज्यसंधीयानां विदुषामपि समयज्ञताविधुराणां विफलं धर्मसंरक्षणक्रमं समवलोक्य बहूनां चेखिद्यते चेतः । वाञ्छन्ति च ते मार्गदर्शनं समयज्ञैः परंपराभिमानगम्भीरैः पण्डितैः । युक्तं चैतत् । बौधायनेनापि (१.१)

"बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः ।
तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशये ॥"

इति वदता बहूनामेकत्रावस्थानमपेक्षितम् । कलिवर्ज्येष्वत एव

"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निर्वर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥"

इति महात्मकृता व्यवस्था धर्मपरिवर्तननिर्णायकत्वेनाङ्गीकृता । परंपरामेतामनुसृत्य भारतीया यदि धर्मनिर्णयाय धर्मपरिवर्तनाय धर्माचारसंकोचाय संमीलिताः स्युस्तदावश्यमेव धर्मोन्नतिर्भविष्यति । ग्रन्थवचनरूढिपरतन्त्राणां तु विदुषां न तत्रोपयोग इति स्पष्टमेव । तत्त्वनिष्ठानां तु धर्मतत्त्वज्ञानां सामाजिकवैयक्तिकोत्कर्ष एव धर्मफलमित्यर्थेऽसंदिग्धानां चेदेकत्र मेलनं भविष्यति तदा ध्रुवमेव धर्मोत्कर्षः स्यात् । तदर्थं प्रथमतो धर्मस्यैतादृशं बुद्धिग्राह्यं स्वरूपं निर्णयपद्धतिश्चैतादृशी सविस्तरं यथा प्रकाशिता स्यादेतादृशो विस्तृतो ग्रन्थोऽपेक्षितः । तस्मिन् ग्रन्थे धर्मस्य यदि ऐहिकं फलमभ्यासपूर्वकं विविच्यते तदा संमीलितानां सह विचारसौकर्याय तदावश्यकं भविष्यति । सहविचारपूर्वकं प्रदर्शितो निर्णयश्चिकित्साशालिनामुपकाराय भविष्यति । ततश्च यद्यदाचरति श्रेष्ठ इति न्यायेनेतरा अपि धर्ममार्गे बद्धादरा भवेयुः ।

कार्यारम्भः

एतादृशविचारपरैर्विद्वद्भिर्महाराष्ट्रदेशीयैर्धर्मनिर्णयमण्डलं स्थापयित्वा तदाश्रयेण महाराष्ट्रदेशे धर्मप्रसारकार्यमपि प्रारम्भितं वर्तते । तैस्तु हिन्दुधर्मस्य वास्तविकोज्ज्वलस्वरूपप्रकाशकाः केचन ग्रन्था महाराष्ट्रभाषायां प्रकाशिताः । किंच सांप्रतिकानां जनानां प्रदीर्घाचारादावशक्ति पर्यालोच्य 'समकोचयदाचारं प्रायश्चित्तं व्रतानि चेति' परंपरां ज्ञात्वा अतीव सुलभा उपनयन-विवाह-अन्त्येष्टि-श्राद्ध-प्रयोगा अपि प्रवर्तिता वर्तन्ते । सांप्रतिकानामैक्यभावनामभिलक्ष्य प्रयोगाश्चैते सर्वे सकलहिन्दुसाधारणतया घोषिताः । धर्मनिर्णयमण्डलपुरस्कारेण वाऽन्यसभापुरस्कारेण वा भवतु यद्याधुनिका हिन्दुधर्मपरिशोधनं स्वयं तादृशाचाराणां समादरं कृत्वा तथैवैहिकोन्नतौ तेषामतिनिकटं संबन्धं प्रदर्श्य संघशस्तादृशाचारप्रचारं कुर्युस्तदैव हिन्दुधर्मस्यानुयायिनां प्रथमतो बुद्धिसमाधानं भवेदनन्तरं च यद्यदाचरति श्रेष्ठ इति न्यायेन नवीकृताचारप्रवर्तनमपि भवेदेव । तथा सत्यादरोऽपि धर्मे वृद्धिमेष्यत्यन्ते चोत्कर्षः । अतो विद्वद्भिः प्रथमतस्तादृशमेव विवेचनं समादरणीयं येन श्रोतॄणां धर्मे विचिकित्सा समादरश्च वृद्धिमेष्यति । नान्यः पन्था विद्यतेऽयनाय इति शम् ।

हिन्दुसमाजे प्रतिदिनं वर्धमानस्य धर्मानादरस्य निरासे कीदृशः प्रयासोऽपेक्ष्यते ।

श्री अनन्तनारायण शास्त्री, भाण्डारकर इन्स्टीट्यूट, पुण्यपत्तनम् ।

मानवं शास्त्रं धर्मधर्मवित्स्वरूपमभिधाय सनातनधर्मसंरक्षणे त्रैविद्यहेतुकादिबहुरूपसुधीसंवलितां दशावरां त्र्यवरामेकवेदविद्द्विजभूषितां वा परिषदं संपाद्य धर्मनिर्णयपरिवर्तनानि सुधीभिः कार्याणीत्याशेते । श्रुत्यादिमानगम्यधर्मरतास्तिकवरान्ब्राह्मणानन्तरा सदुपदिष्टा अपि सङ्गदोषदूषितान्ता यत्किमपि लपन्तस्तात्कालिकमानससुखाभासरताः स्वीकृतपरकीयवेषभाषाचारा अनुरुद्धहीणपठनबोधाचारास्तद्विद्याभ्यासगृहीतापूर्वसंनाविस्मृतस्वजात्याचाराः सनातने पथि प्रवृत्तांश्च सद्धर्मास्तिरस्कृत्यापूर्वशिक्षणवशात्प्राच्यविद्याशोधने प्रवृत्य वेदशास्त्राण्यमर्यादं नूतनेन पथा प्रवर्तयन्तो मनुंमन्या धर्मनिर्णयपरिवर्तनादिषु सर्वथा न प्रभवेयुः ॥

अतस्तादृशाः पूर्वोक्ता ब्राह्मणाः प्रयत्यापि स्वतपोनियमविशेषैरुपदर्शितस्वमहिमवरा विमृष्टशिष्टाचारा अवधूतसद्धर्मा लोकक्षेमावहानवद्यश्रौतपद्यावदातहृदयास्तादात्त्विकीरतत्र तत्र परिषदः प्रकल्प्य तत्र निर्णीतधर्मांश्च ब्राह्मणमुखेनैव सर्वास्वाशासु यथास्वं सद्धर्मान्सर्वे समाचरेयुस्तथा प्रयतेरन् ॥

ब्राह्मण्यसंरक्षणम् ।

स्नानसंध्यादिभिर्यजनयाजनादिषु बद्धादरा अवगीतशिष्टाचारधुरन्धराः शमादिधना निरन्तरस्वाध्यायतत्परा ये त एव ब्राह्मणाः । अनेवंविधाश्च परकीयवासनाक्रान्ता आगमादिषु विश्वासरहिता भुक्त्या तृप्तिमिवादृष्टसद्यःफला अश्रद्धया च धर्मास्तित्यक्षन्तः स्वोत्कर्षाविमर्शाच्छाब्ध्याद्वान्यसमक्षमेवोदाहृतविविधहेत्वाभासा वर्णाश्रमान्न मानयन्ति । परं तु स्वाध्यायिनोऽपि स्वयमनर्थज्ञाः सन्तः प्रतिग्रहैकरता दृश्यन्ते । शूद्रवत्परानपि सेवन्ते । कर्मणापि शूद्रकल्पा भवन्ति । वर्णिनश्च नाधीयते । न शुश्रूषन्ते गुरूनभ्यस्यन्ति परं हौणीं वाणीं त्यजन्ति च शिखाम् । गृहिणोऽप्युल्लङ्घितब्राह्मादिविवाहविधयः स्वैरिणो दृश्यन्ते । जितारिवर्गा विशिष्टा यतिनोऽपि प्रायः स्वोत्कर्षैकस्पृहाः स्वार्थं बुद्ध्वा न्यायालयमुपधावन्ति । द्वैताद्वैतमतेषु स्वमतैकप्रतितिष्ठासवः परमतखण्डनेऽमर्यादं प्रवर्तन्त इति दिक् ॥

नैतेषां ब्राह्मण्यं श्रुतिस्मृत्याद्यनुगृहीतमस्ति । प्राञ्चस्तु ब्राह्मणाः कपिलागस्त्यभृगुवसिष्ठाद्याः ब्रह्मिष्ठाः सागरभस्मीकरणादिभिरद्भुतकर्मभिरर्चनीयतमा आसन् । धर्मशास्त्ररीत्या न्यायाधीशाः पुरा न ब्राह्मणविरोधे न्यायं निरणयन् । ब्राह्मणवधदण्डश्च नाभूत् । इत्याद्यस्ति बहु वेदनीयम् । अतो ब्राह्मण्यसंरक्षणेन सर्वथा लोकक्षेमनिर्वाहो धर्मेष्वादरश्च नियतमुत्पद्यत इति सर्वैर्ब्राह्मण्यसंरक्षणे श्रद्धेयम् ।

परस्परसाहाय्यम् ।

एवं हि भगवतीच्छा यत्सर्वेऽपि प्राणिनो विविधधर्मा अपि स्वस्व-

धर्मानुष्ठानद्वारा परस्परं साह्येन सुखिनः स्युरिति । श्रुतिस्मृत्यादिषु सूक्ष्मार्थदर्शिनो यथार्थधिया विवेकाधानेन, विगलितदुष्टभावेन ध्येयवस्तुमात्राभिमानेन सत्कार्यप्रथनेन, स्वानुभवविदितोचितशास्त्रीयविषयाणां संवदनेन परोपकारायोपदेशवरैः, परोत्कर्षावहाः स्वपरेभ्यः क्षेमाधानेन च स्वधर्मानुपबृंहयेयुः । अस्मदाचार्यास्त्वालस्यस्वाभिमानवित्ताभावैरपि धर्मानादरो भवेदिति यथा लोकमर्यादं व्याचख्युः । अतएव वित्तार्जनेनापि धर्मरक्षणं सुसंपादमिति नवीना मन्यन्ते ॥

इह च भरतखण्डे तत्तन्मठाधीशाः सर्वजनसाधारण्येन धर्मानुपदिशन्तो निराशा अपि सदाशाप्रपूरणनिरन्तरोत्सुकाः सार्वदिकतत्तद्विद्वज्जनतापेक्षितवित्ताद्युपकाराविष्कृतविततनिजौदार्याः श्रीभवानीजानिरिव शिष्यादिभिरुपदेशनैश्चिरं क्षेममावहन्तो निवृत्तैषणा अपि प्राप्तचतुरङ्गा राजन्या इव श्रीनिकेतना विराजन्ते । एतेऽपि श्रीभगवत्पादा इव सततशिष्योपदिष्टश्रौतमार्गाः शाश्वतिकसुखहेतवोऽद्यापि प्रथेरंश्चेत्तर्हि वैदिको धर्मः प्रतिष्ठिततरो भवेदिति निश्चिन्मः । मठसंपादितं च द्रव्यं शिष्यप्रशिष्यद्वारा वर्णाश्रमपरिपालनमन्तरेण न स्वार्थे नापि न्यायालयस्थलार्थे चान्यत्रानुचिते पथ्युपयुञ्जीरन् । एतदर्थं च भगवान्भवानीजानिरपि सदयमनुगृह्णीयादिति तमेव शरणीकुर्वाणाः प्रार्थयामहे । एवं च त्रिभिरप्येतैर्हेतुभिरुदिते धर्मानादरे तन्निरासायास्माभिः परस्परसहायेन धर्मैकपरायणैः स्वानूचानधर्मनिषेवणतत्परैश्च भाव्यम् । ईशानश्च 'न वित्तार्जनेन स्वोदरपोषणं, किन्तु स्वधर्मार्जनेन सुखप्राप्तिरेवैष्टव्या' इत्याह । गीताचार्योऽपि 'स्वधर्मेण मामेवैष्यतीति' स्वधर्मानुष्ठानेन परमनिःश्रेयसमाविष्कुर्वते । तस्मात्परिषद्विधानब्राह्मण्यसंरक्षणपरस्परसहायरूपैरुपायैस्त्रिभिरपि धर्मानादरो लोके निरसनीय इत्येकान्तेन वयमभिप्रेमः ।

---

* श्रीः *

हिन्दुसमाजे प्रतिदिनं वर्धमानस्य धर्मानादरस्य निरसनाय कीदृशः प्रयासोऽपेक्ष्यते ।

पं० सूर्यनारायणशर्माचार्यः भूतपूर्वसंस्कृतप्रधानमहाध्यापकः, जयपुर ।

यदाऽस्माकमस्मिन् भारते गौराङ्गशासनं कृतपदमभवत् क्रमेण च सुस्थिरीभूतं तदा शासनाधिकारिभिः स्वसौकर्यायात्र स्वमातृभाषाया आङ्गल्याः पठनपाठने प्रारब्धे। तस्यां च भाषायां न केवलं भारतीयधर्मतत्त्वानां वर्णनं, विवेचनं, प्रबोधनं, समर्थनं च नास्तीत्येव, किन्तु तेषां निस्सारतायाः, अनुपयुक्ततायाः, असामयिकतायाः, कल्पनामात्रप्रसूततायाः अन्धपरम्परारूपतायाश्चापि बहुत्र संकेतमात्ररूपेण क्वचित् क्वचिच्च सुस्पष्टरूपेणापि प्रतिपादनं लभ्यते। तथा च यावत्कालपर्यन्तं तस्या भाषाया प्रचारो न्यून आसीत् सहैव च गौणरूपेणापि संस्कृतभाषाया अध्ययनमपि प्रवृत्तमासीत् तावत्तु संस्कृतभाषाया अध्ययनार्थं नियतेषु ग्रन्थेषु तत्र तत्र धर्मगौरवस्य, सदाचारमहत्त्वस्य, नीतिगाम्भीर्यस्य, शास्त्रसौष्ठवस्य च पठनावकाशस्य लभ्यमानत्वादध्येतॄणां बुद्धिर्धर्मे महत्त्वं परिचिन्वती धर्मे विषये श्रद्दधाना धर्मपथाद्विचलिता नाऽभूत्। न च लोका धर्मानादरमकुर्वन्। परं यदा तु संस्कृताध्ययनं विज्ञानादिशिक्षाप्रचारस्य बाहुल्येन प्रतिरुद्धप्रायमभूत्, तदा धर्मज्ञानमनाश्रितं सत् स्वयमेव ह्रासोन्मुखमभूत्। किं च सुचिरादस्माकं देशे पुराणवाचनस्यापि देवालयादिषु प्रथा प्रचलिताऽभूत् सापीदानीं स्मृतिमात्रशेषतां प्राप्ता तथा च भागवतादिकश्रवणेनापि यावज्ज्ञानं लोकानामनायासेन जायमानमभूत् तावन्मात्रस्यापि धर्मज्ञानसाधनस्य विनष्टत्वात् कथङ्कारं लोकानां धर्मज्ञानं संभवेत्, कथं च तन्महत्त्वपूर्णरहस्यज्ञानाभावात् तस्मिन् धर्मे श्रद्धा संपद्येत, कथं च तस्याः स्थिरत्वं जायेत। तथा च धर्मज्ञानविहीना नरा धर्मं केवलं क्रीडनकमिव मन्यमानास्तस्योपहासमनादरं च कुर्वन्ति। न शास्त्रेषु विश्वसन्ति न धार्मिकविधिषु कर्तव्यताबुद्धिं धारयन्ति, न संस्कृताध्ययनं कर्तुं समीहन्ते, न पुराणमहाभारतादिपठने प्रयतन्ते, न सदाचारं श्रेष्ठं मन्यन्ते, न च कुत्रापि तेषां कुतर्कोपहता बुद्धिः स्थिरतां गच्छति।

ते अधीयतां नाम विज्ञानादिकान् नवनवान् लौकिकोन्नतिसाधकान् विषयान् परं तैरस्य देशस्य धर्मप्राणतामालोच्य, धर्मानुष्ठानस्य महत्त्वमवधार्य, शास्त्रस्य गाम्भीर्यमैहिकामुष्मिकश्रेयःसाधनत्वं च विचार्य समस्तधार्मिक ज्ञानसाधनमूलभूतायाः संस्कृतभाषाया अपि पठनार्थं स्वल्पसमयो देयः। यदि तथा न संभवात् तर्हि संस्कृतज्ञसदाचारसंपन्नपण्डितानां सेवायां समुपस्थाय तैः प्रतिपादितो धर्मविषयः श्रोतव्यो, मन्तव्यो, निदिध्यासितव्यश्च। तैरपि पण्डितप्रवरैस्तत्र तत्र सभासु पदार्पणं कृत्वा याथार्थ्येन धर्मतत्त्वानां, धार्मिकेतिकर्त-

व्यानां, सदाचारशिक्षकपुराणादिकथानां च व्याख्या कर्तव्या, न केवलं स्वोपस्थापितप्रस्तावस्वीकृतिमात्रेण संतोष्टव्यम् ।

तथा च धर्मानुष्ठानपरायणानां, सदाचारसंपन्नानां, स्वाध्यायशीलानां, व्याख्यानशैलीपरिचितानां विदुषां यथा देशे बाहुल्यं संपद्येत, यथा च ते धर्मप्रचाराय सोत्साहं प्रवर्तेरन् तथा तेषां वृत्त्यादिसौकर्यं विधाय सुखजीवनाय प्रयत्नो विधेयः ।

प्रतिनगरं धर्मसभानां योजना कार्या, तासु च समये समये सुविज्ञान् पण्डितान् आमन्त्र्य तद्द्वारा धर्मप्रचारः कर्तव्यः। कथाप्रवचनव्यवस्था विधेया । नवसंस्कृतग्रन्थनिर्मातॄणां प्रोत्साहनाय समुचितपुरस्कारादिव्यवस्थापनं विधेयम् ।

शिक्षणालयेषु धार्मिकशिक्षायाः कृतेऽपि समुचितः प्रबन्धो विधेयः। प्राचीनसंस्कृतसाहित्ये विद्यमानानामुपदेशपूर्णानां काव्येतिहासनाटकादीनां पठनपाठनादिव्यवस्था कर्तव्या ।

धार्मिकसंस्काराणां महत्त्वमवश्यकर्तव्यतां चानुबोध्य यथा तेषामनुष्ठाने लोकानां रुचिर्वर्धेत तथा तत्प्रतिपादकानां ग्रन्थानां व्याख्या कारयितव्या ।

येषु राज्येषु धर्मार्थं कूपक्षेत्रभूमिग्रामादीनामुत्सर्गः पुरातनै राजभिः कृतोऽस्ति तेषामधिकारिणो यथा विद्वांसो धर्मशीलाश्च भवेयुस्तथा तेषां शिक्षायाः प्रबन्धेऽवधानं देयम् । साम्प्रतिकनृपतयश्च यथा धर्मप्रचारार्थं द्रव्यविनियोगं कुर्युस्तथा ते प्रोत्साहनीयाः ।

इत्येवमादिषु उपायेष्वनुष्ठितेषु धर्मतत्त्वमहत्वज्ञानद्वारा धर्मानादरस्य ह्रासो धर्मश्रद्धायाश्च वृद्धिः स्यात् । इतिशम् ।

* श्रीः *

'हिन्दुसमाजे प्रतिदिनं वर्धमानस्य धर्मानादरस्य निरसनाय कीदृशः प्रयासोऽपेक्ष्यते ।

(लेखक—बद्रीनाथ शास्त्री, एम० ए०, जयपुर)

श्रीमन्तः सभापतिमहोदया विविधविद्यापारङ्गताः समुपस्थिता विद्वांसश्च ।

पुरा यत्र यत्रेतिहासपुराणादिषु श्रूयते तत्र सर्वत्र भारतवर्षीयाणां सकलजगदपेक्षया धार्मिकतरत्वं विशेषतश्च ब्राह्मणानामाचारशिक्षणेऽधिकार उपलभ्यते । यथा—

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥'

इदानीं तु तद्विपरीता दशा दृश्यते । अत्र भारतवर्षे प्रायः सर्वेषामपि हिन्दुसमाजीयानां संस्कृतवाङ्मयाध्ययने पराङ्मुखानामितरभाषासु च बाहुल्येन शिक्षितानां जन्मत आरभ्यैव विधिवदसंस्कृतानां निजधर्मं वस्तुतः स्वरूपतश्चाजानतां पाश्चात्यसभ्यतामेवाद्रियमाणानां प्रतिदिनं धर्मेऽनादर उत्तरोत्तरं वर्धते । एतन्निरसनाय कीदृशः प्रयासोऽपेक्ष्यत इति जिज्ञासायां निवेद्यन्ते मया यथामति केऽप्युपाया येषु यथावत्कृतेषु पुनरपि संभवति कदाचिद् हिन्दुसमाजे धर्मादरः ।

१. आधुनिकपठनपाठनप्रणाल्यां धार्मिकशिक्षायाः संनिवेशोऽवश्यं विधेयः । सा च धार्मिकग्रन्थानामध्यापनेन व्याख्यानादिना कथावाचनादिना नित्यनैमित्तिककाम्यकर्मणामाचारप्रचारादिभिश्चाध्येतॄणामन्येषां च जनानामात्मनि धार्मिकश्रद्धोत्पादनेन भविष्यति ।

२. वैज्ञानिकेऽस्मिन् युगे हिन्दुजनतायाः श्रद्धा विश्वासश्चेतरधर्मावलम्बिविलासिजनैः सह संसर्गाल्लुप्तप्रायौ संजातौ । सर्वेऽपि नास्तिकप्रायाः प्रत्यक्षमेव प्रमाणं मन्यन्ते । न त्वनुमानादिकम् । अस्माकं सकलोऽपि धर्मः पुस्तकेषु निबद्धः, शब्दमात्रप्रमाणैकगम्यः केवलमाप्तगुरुजनोपदेशादिना ज्ञातुं शक्यते । 'स्वर्गकामो यजेत' 'अहरहः संध्यामुपासीत' 'गुरुजनशुश्रूषा कार्या' इत्यादिवाक्येषु श्रद्धाया अभावात् केचिज्जनाः पृच्छन्ति स्वर्गस्य सत्त्वे किं मानमिति । नहि स्वर्गः प्रत्यक्षेण कस्यापि दृष्टिगोचरः । नहि स्वर्गसुखमनुभूय कोऽपि प्रतिनिवृत्त्य देशान्तरयात्रादिवद् वृत्तान्तं वर्णितवान् । प्रायः शतेऽशीतिसंख्याका मनुष्या आत्मन्यश्रद्दधाना गौरोऽहं स्थूलोऽहमित्यादिप्रतीत्यां देहमेवात्मानं मन्यमाना ब्रुवन्ति—

"न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः ।" इति ।

अन्ये च कथयन्ति प्रत्यहं संध्योपासनेन किं भवति ॥

इतरे वदन्ति निखिलकार्येषु निर्विघ्नतासिद्ध्यर्थं प्रथमं गणेशोऽभ्यर्च्यते । तस्य चातिस्थूलकायस्याल्पप्राणो मूषिको वाहनमिति कथं संगच्छत इत्यादिनानाविधशङ्कानिरासार्थं युक्तिसंगतं वैज्ञानिकं समाधानमपेक्ष्यते धर्मे श्रद्धोत्पादनायास्मिन् युगे वैज्ञानिके ।

तस्मिन् समये गुरुभिरेतादृशैर्भाव्यं ये धार्मिकं विषयं वैज्ञानिकशैल्या शिष्यान् बोधयेयुः । स्वसंर्गेण च तेषां मनसि विश्वासमुत्पादयेयुः । येन तान् दृष्ट्वा शिष्याः प्रभाविताः स्युः । परंतु गुरव ईदृशा वर्तमानसमयेऽतीव विरलाः । यथोक्तम्—

'परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥' इति

यदीदृशाः श्रुतिशास्त्रसंपन्ना विद्वांसः समुपलभ्येरंस्तर्हि कृतोपनयनसंस्कारा द्विजा हिन्दुविश्वविद्यालयादितुल्ये स्थाने तेषामध्यापकानां सविधेऽध्ययनार्थं प्रेषणीयाः । यत्र ते व्रतं पालयन्तो यावत्समावर्तनं विद्याभ्यासं कुर्युः निजं कर्त्तव्यं च निश्चिनुयुः । ततश्च कृतविवाहादिसंस्काराः स्वजीवनयात्रां निर्वहन्तो चतुरोऽपि पुरुषार्थान् साधयेयुः । उक्तं च—

आद्ये वयसि तत् कुर्याद् येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत् कुर्याद् येन प्रेत्य सुखं वसेत् ॥ इति

३. भारते वर्षे बहूनि मन्दिराणि वर्तन्ते तत्र सर्वत्र कथावाचनप्रबन्धो विधेयः । वाचकाश्च वीतरागद्वेषा धर्माचाररता अनुभविनो वृद्धाः स्युः ।

ये निज पुत्रपौत्रादीन् धार्मिकांश्चिकीर्षन्ति तैः स्वयं धर्मपरायणैर्भाव्यम्, ये जन्मतः प्रभृत्येव धार्मिकसंसर्गे निवसन्ति सदाचारं च विलोकयन्ति तेषामात्मनि तथैव संस्कार उत्पद्यते स च यावज्जीवं तिष्ठति न कदापि परिवर्तते । यथोक्तम् ।

'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ॥' इति

४. उत्सवेषु मेलकेषु च यत्र जनाः सहस्रश एकत्रिता भवन्ति तत्र महत्तां मठाधीशानां विदुषां च रोचकव्याख्यानार्थं योजना कार्या । यदि तानि व्याख्यानानि न केवलं धर्मिष्ठान्येव किन्तु श्रोतॄणां रुचिकरण्यपि स्युस्तर्हि नरास्तत्रेतराणि दृश्यानि विहाय तत्रैव चित्तविनोदार्थं समागमिष्यन्ति । इतरथातु—

'किं करिष्यन्ति वक्तारः श्रोता यत्र न विद्यते ।'

५. इत्युक्तिश्चरितार्था संपत्स्यते ॥ प्रचलितदेशभाषायामाङ्ग्लभाषायां च नूतनधार्मिकग्रन्थानां विज्ञान सरणिमनुसृत्य रचनाऽऽवश्यकी । यत्र धा-

मिककृत्यानां नित्यानां नैमित्तिकानां काम्यानां च कर्मणां सोपपत्ति सुगमं संक्षिप्तं व्यवस्थितं वर्णनं भवेत्। येन प्राकृता अपि जना धर्मे श्रद्धालवो भवेयुः।

आधुनिकनूतनाविष्कृतसिनेमाद्यभिनेयानां रेडियोद्वारा श्राव्याणां च धर्मोपदेशपूर्णानां नूतननाटकदृश्यश्रव्यकाव्यानां निर्माणार्थं यावच्छक्यं यतितव्यम् । एतेन साधारणहिन्दुजनसमुदायोऽपि चरित्रविधानकेभ्यो-ऽश्लीलादिदोषदुष्टेभ्योऽभिनयेभ्यश्चित्तमाकृष्याभ्युदयकारकेषु धार्मिकेष्व-भिनयेषु प्रेरयिष्यति। एवं च हिन्दुसमाजे प्रतिदिनं वर्धमानस्य धर्मानाद-रस्य निरसनमेभिरन्यैश्चैतादृशैः प्रयासैर्भविष्यतीत्यलमतिपल्लवितेन ।

हिन्दी विभाग

मुगलकालीन कवि रामानन्द ।

(लेखक—पंडित करुणापति त्रिपाठी, एम० ए०, व्याकरणाचार्य, बनारस हिन्दू यूनिवर्सिटी)

हिन्दी साहित्य के कुछ इतिहास लेखकों ने काल-विभाजन तथा उनका नाम-करण करते हुये उत्तर-मध्य-काल को रीतिकाल का नाम दिया है। यह नाम कुछ विचित्र सा जान पड़ता है। क्योंकि विभक्त कालों के नाम उक्त कालकी मुख्य रचना-प्रवृत्ति के आधार पर रखे गए हैं। अतः 'रीतिकाल' का साधारण अर्थ रीतियों का काल ही होता है। पर इस सम्बन्ध में 'रीति' शब्द का जिस अर्थ में इन इतिहासज्ञों ने प्रयोग किया है, वह संस्कृत में प्रचलित पारिभाषिक शब्द से कुछ भिन्न सा है।

